XVII. E. 32.

किरातार्जुनीय ...

... ... गद्यसंग्रहः

GADYA SANGRAHA

OF

Bharavi's

KIRATARJUNIYA

BY

Ayurveda-Bhushan

Pandit M. Duraiswami Aiyangar, A. K. A. C.

Translator of Kadambari, Megha-Sandesa,
Ashtanga-hridaya, Madhava-Nidana,
Sarngadhara-Samhita etc. into
Tamil and Editor of
The Vaidya-Kalanidhi.

with

THE COMMENTARY


TIKA-GHANTAPATHA

The Vaidya Kalanidhi office,

Vepery, Madras.

1926.

Copy-Right


ADYAR LIBRARY
Section C
Shelf 17. C.
Number 32.
Madras.

॥ श्रीः ॥ 17. C. 32.

॥ किरातार्जुनीय-गद्यसंग्रहः ॥

ADYAR LIBRARY
EASTERN SECTION
GENERAL No. 4627

आयुर्वेदभूषणेन

मे. दुरैस्वामी अय्यङ्गार्महाशयेन

संगृहीतः

टीकाघण्टापथाख्यया लघुव्याख्यया

सहितः


वैद्यकलानिधिकार्यालयेन

प्रकाशितः

वैद्यकलानिधि आफीस्, वेपेरि-मदरास्.

१९२६

ADYAR LIBRARY



PH823.19
Dur
KG xy

। प्रस्तावना ।

17.12.32

प्राक्तनीं पद्धतिमनुरुध्याभ्यस्तविद्यानां विदुषां विदितमेवैतत्, यदुत गीर्वाणभाषाया अभ्यासाय समुद्युञ्जानाश्छात्राः प्रायः प्रथमतो रघुवंश-नैषध-कुमारसंभव-किरातार्जुनीयादीनि काव्यानि पठितुमुपक्रमन्त इति । इदमपि विदितमेव वस्तुतत्त्वमस्माकम्, यत् छात्रेषु तेषु सुबहवस्तानि हृदयङ्गमान्यपि महाकाव्यात्स्यामूलादा चाग्रात् न कात्स्न्र्यतः पठन्तीति । अतः काव्येष्वेषु निर्दिष्टाया वस्तुरचनायाः समग्रतो निरूपणे वा, तादृशीनां कथानां निबन्धनेषु कवीनामाशयः कीदृश इति विमर्शने वा, कथानां तथाविधानामैतिहासिकीनां गुणदोषपरिशीलने वा नूनं न ते भवन्ति प्रभविष्णवः । नियमेन 'नगरार्णवशैलर्तुप्रभृतीनां' सुतरामुच्छृङ्खलैरुद्वेलैश्च वर्णनैर्ग्रन्थानामतिभूमिं गता विस्तृतिरेकत्र, खरतरश्लेषयमकानुप्रासचित्रबन्धादिरूपाः श्लक्ष्णेतरप्रयोगा निरन्तरं कन्दलिताश्चापरत्र पाठकानुद्वेजयन्ति, प्रतिघ्नन्ति च तेषां गतिम्। इदमेव काव्यानामसमग्रपठनस्य प्रधानं निदानम् । अतो हेतोः क्रमेणामूनि काव्यानि सरलया गद्यसरण्या संग्रहेण ग्रथनीयानीति कालैः कतिपयैः प्रकृत्यैव मनसि मे मनोरथस्य किमपि बीजमुप्तम् ; तस्यायं किरातार्जुनीयगद्यसंग्रहः प्रथमो भवत्यङ्कुरः ।

भारवेः कृतिरियं कृतमतिभिः सहृदयैः सुतरां प्रशस्यते, महाकाव्येष्वन्यतमत्वेन परिगण्यते च । तथापि सुकुमारधियामशो-

षस्य काव्यवस्तुनोऽस्य जिज्ञासूनां न सुकरः प्रवेशोऽत्र । पाकस्यादसीयस्य मल्लिनाथप्रभृतिभिरपि महामतिभिर्नारिकेलसदृशत्वमभिप्रेतम् । अतः काव्यस्यास्य पठनोत्सुकानां कोमलधियामुद्यममुच्छृङ्खलयितुम्, पाठशालासु विविधास्वाधुनिकीषु स्वीकृतसंस्कृतभाषानुपकर्तुं च विद्यार्थिनः संप्रति ममैष यत्नः । अस्मिंश्च संग्रहे भारवेस्तेषु तेषु पद्येषु विद्यमानानि पदगुम्भनान्येव गद्यरचनासु च मया प्रायः सन्त्यादृतानि । स्थलेषु कतिपयेषु गद्यरचनाया हृद्यत्वापादनाय च, सन्दर्भस्य तस्य तस्य समञ्जसत्वसंपादनाय च पदानि कतिचन किञ्चिदिव परिवर्तनीयान्यासन् । तथापि नार्थपोषणं वा न कविहृदयं वा मात्रयापि कुत्राप्यनादृतम् । किरातार्जुनीयस्य सर्वेष्वष्टादशसंख्याकेष्वपि सर्गेषु सन्ति १०४० संख्याकानि पद्यानि । मधुकरन्यायेन मया ततः पद्यानि ४८० संख्याकान्येव गृहीतानि, गद्यात्मना च ग्रथितानि । प्रकरणानां केषांचन प्रसाधनार्थं पद्यानि च परिमितान्येव कानिचन तथैव स्वीकृतानि । मल्लिनाथस्य घण्टापथव्याख्यानात्, पाठकानां विशेषतः सौकर्यापादनाय, संगृहीतैरावश्यकैरंशैरेव काचन टीकापि 'टीकाघण्टापथः' इति नाम्ना भवत्यत्र संयोजिता । मन्ये, मान्या गुणैकपक्षपातिनो मनीषिणः प्राथमिकं मे गद्यसंग्रहात्मकं ग्रथनमिदं सादरमनुग्रहेण संभावयेयुरिति ।

३०-७-१९२६. मे. दु.

17. 8. 28.

॥ श्रीः ॥

॥ किरातार्जुनीय-गद्यसंग्रहः ॥

। प्रथमः सर्गः ।

युधिष्ठिरः कदाचित् द्वैतवनात् प्रजासु कुरूणामधिपस्य प्रवृत्तिं वेदितुं वर्णिलिङ्गिनं कमपि वनेचरमयुङ्क्त; स च विदितवृत्तान्तः समागत्य महीमुजे प्रणनाम । तदा महीं सपत्नेन जितां युधिष्ठिराय निवेदयिष्यतो न तस्य क्लिश्यते मनः; न हि हितैषिणो मृषा प्रियमिच्छन्ति प्रवक्तुम् । विद्विषां विघाताय

॥ टीकाघण्टापथः ॥

युधिष्ठिर इति वस्तुनिर्देशरूपः कथाया उपक्षेपः क्रियते । **द्वैतवनात्**--द्वैताख्यात् तपोवनात् । **कुरूणाम्**--कुरूणां निवासः कुरवः, तदाख्या जनपदाः, तेषाम् । **वर्णिलिङ्गी**--वर्णी ब्रह्मचारी, तस्य लिङ्गमस्यास्तीति वर्णिलिङ्गी, ब्रह्मचारिवेषवान् । **वनेचरं**--वने चरतीति अलुक्समासः, किरातम् । **सपत्नेन**--रिपुणा दुर्योधनेन । **विद्विषामिति**--द्विषो विहन्तुमुद्युक्तज्ञानस्येत्यर्थः।

किमपि विधातुमिच्छतो भूभृतः स चानुज्ञामधिगम्य, विनिश्चितार्थो रहसि वाचमेवमादद्दे ।

"देव! चारचक्षुषः प्रभवः क्रियासु नियुक्तैरनुजीविभिर्न वञ्चनीयाः । अतः साध्वसाधु वा मदुक्तमर्हसि क्षन्तुम्; हितं मनोहारि च दुर्लभं हि वचः । स किंसखा, यः साधु नाधिपं शास्ति; स च किंप्रभुः, यो न हितान् संशृणुते; नृपेष्वमात्येषु चानुकूलेषु हि सदा रतिं सर्वसम्पदः कुर्वते । निसर्गदुर्बोधं क चरितं भूपतीनाम्, क चाबोधविक्लबा जन्तवो मादृशाः; तथापि भवतोऽयमनुभावो यन्निगूढतत्त्वं नयवर्त्म मया विद्विषामवेदि । नृपासनस्थोऽपि स सुयोधनो वनाधिवासिनः पराभवं भवतो विशङ्कमानो दुरोदरच्छद्मना जितां जगतीं नयेनापि जेतुं समीहते ।

वाचमादद्दे—उवाचेत्यर्थः ।

चारचक्षुष इति । 'स्वपरमण्डलेषु कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपतीनाम्' इति नीतिवाक्यामृते । **शास्ति**—उपदिशति । **किंप्रभुः**—कुत्सितः प्रभुः । एवमेव किंसखेत्यस्य कुत्सितः सखा, दुर्मन्त्रीत्यर्थः । **निसर्गदुर्बोधं**—स्वभावत एव दुर्ग्रहम्। **अबोधविक्लबाः**—अज्ञानोपहताः। **निगूढतत्त्वमिति**—संवृतयाथार्थ्यम् । नयवर्त्म—सन्धिविग्रहयानासनद्वैधीभावाश्रयाख्यानां षड्गुणानां यथावत्प्रयोगः । **अवेदि**—विदेः कर्मणि लुङ् । **नृपासनस्थः**—सिंहासनस्थः । **दुरोदरमित्यादि**—दुरोदरं

स भवज्जिगीषया जिह्मः शुभ्रं गुणसम्पदा तनोति यशः । तेन च जितारिषड्वर्गेण, मानवीमगम्यरूपां प्रपित्सुना पदवीम्, नक्तंदिवमस्ततन्द्रिणा नयेन विभज्य वितन्यते पौरुषम् । स गतस्मयः सन्ततमनुजीविनः प्रीतान् सखीनिव, सुहृदश्च बन्धुभिः समानमानान्, बन्धुतामपि कृताधिपत्यामिव साधु दर्शयते । स शङ्कितः परेतरान् परितो रक्षान् विधाय, स्वयमशङ्किताकारमु-

---

द्यूतम्; छद्मना जिताम्—कपटेन लब्धाम्; दुर्नयार्जितामित्यर्थः। **भवज्जिगीषया**—गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः। **जिह्मः**—वक्रः, वञ्चक इत्यर्थः । **गुणसम्पदा**—दानदाक्षिण्यादिगुणगरिम्णा। **जितेत्यादि**—षण्णां वर्गः षड्वर्गः, अरीणाम्—अन्तश्शत्रूणां षड्वर्गः अरिषड्वर्गः; कामक्रोधलोभमोहमदमत्सराः; जितः अरिषड्वर्गः येन तेन । **अस्ततन्द्रिणा**—अस्ता तन्द्रिः आलस्यं येन तेन; 'निस्तन्द्रिरप्रमत्तश्च' इति रामायणप्रयोगवत् । **पौरुषम्**—पुरुषकारः, उद्योग इति यावत् । **विभज्येति**—अस्यां वेलायामिदं कर्मेति विभागं कृत्वेति भावः । **गतस्मयः**—निरहंकारः। **समानमानान्**—तुल्यसत्कारान् । बन्धूनां समूहो **बन्धुता** । कृतं **आधिपत्यं** स्वाम्यं यस्यास्ताम् । **शङ्कितः**—अविश्वस्तः । **परेतरान्**—आत्मीयान् । **परितः**—सर्वत्र, स्वपरमण्डलेषु । **रक्षान्**—मन्त्रगुप्तिसमर्थान् रक्षकान् । **अशङ्किताकारं** यथा तथा—विश्व-

पैति । क्रियापवर्गेष्वनुजीविसात्कृताः सम्पदोऽस्य वदन्ति कृतज्ञताम् । तदीयमास्थाननिकेतनाजिरं भृशमनेकराजन्यरथाश्वभवति संकुलम् । तस्मिंश्च क्षेमं सति वितन्वति, कृषीवलैरकृष्टपच्या इव सुखेन लभ्याः सस्यसम्पदो दधतश्चकासत्यदेवमातृकाश्चिराय कुरवः। संयति लब्धकीर्तयो महौजसो धनेन चार्चिता धनुर्भृतस्तस्याभिन्नवृत्तेयः प्रियाण्यसुभिरपि वाञ्छन्ति समीहितुम् । किञ्च न तेन धनुः सज्यं क्वचिदुद्यतम् ; न वा कोपविजिह्मं कृतमाननम् ; किन्तु नराधिपैः गुणानुरागेणैव माल्यमिव शासनमस्य शिरोभिरुह्यते । स नवयौवनोद्धतमिद्धशासनो निधाय दुश्शासनं यौवराज्ये, अखिन्नमतिः पुरोधसानुमतो मखेषु धिनोति हव्येन हिरण्यरेतसम्। स भूमण्डलं प्रलीनप्रतिभूपालमावारिधि प्रशासदपि, भियमेष्यतीं त्वत्तश्चिन्तयत्येव; अहो दुरन्ता बलवद्विरोधिता । जनैस्तव

स्तवदेव प्रकटयन्नित्यर्थः । **क्रियापवर्गेषु**--कर्मसमाप्तिषु । आस्थाननिकेतनाजिरम्--सभामण्डपाङ्गणम्।**अकृष्टेति**--कृष्टेन पच्यत इति कृष्टपच्यः, तद्विपरीता अकृष्टपच्याः । **अदेवेति**--देवमातृकाः--वृष्ट्यम्बुजीविनो देशाः;ते न भवन्तीत्यदेवमातृकाः, नदीमातृका इत्यर्थः । **महौजसः**--महाबलाः । **समीहितुम्**--कर्तुम् । **इद्धशासनः**--अप्रतिहताज्ञः । **निधाय**--नियोज्येत्यर्थः । **धिनोति**--प्रीणयति । **हिरण्यरेतयं**--अनलम्।**प्रलीनप्रतिभूपालम्**--निरस्तस-

कथाप्रसङ्गेनोदाहृतादभिधानात् , अनुस्मृताखण्डलसूनुविक्रमः स मन्त्रपदादुस्सहादुरग इव नतानने व्यथते । अतो भवद्विषये जिह्मं किमपि कर्तुमुद्यते तस्मिन् प्रतिविधेयमाशु विधीयताम् ।"

इति वनवासिनां पतौ गिरमीरयित्वा गते चात्तसत्क्रिये, कृष्णासदनमथ प्रविश्य महीपतिरनुजानामपि समक्षं वचस्तदखिलमाचचक्षे। ततस्तां द्विषतां सिद्धिं निशम्य द्रुपदात्मजा, तदागताश्चापाकृतीर्विनियन्तुमक्षमा नृपस्य मन्युव्यवसाययोर्दीपिनीरवमुदाजहार गिरः ।

"नाथ! प्रमदाजनोदितं भवति भवादृशेष्वधिक्षेप इवानुशासनम् ; निरस्तनारीसमयास्तथापि दुराधयो वक्तुं मां व्यवसाययन्ति । आखण्डलतुल्यधामभिः स्ववंशजैश्चिरं भूपतिभिरियमखण्डा धृता मही; मतङ्गजेन स्वगिव सैवात्महस्तेनापवर्जिता भवता । मायाविषु ये न मायिनो भवन्ति, व्रजन्ति पराभवं ते; तथा-

---

पत्नामित्यर्थः। एष्यतीं—आगमिष्यतीम् । **कथाप्रसङ्गेन**--गोष्ठीवचनेन, अन्यत्र विषवैद्येन । **जिह्मं**—कपटम् ।

आत्तसत्क्रिये—गृहीतपारितोषिके । **मन्युरिति**—मन्युः क्रोधः, व्यवसायः उद्योगः, तयोः ।

निरस्तनारीसमयाः—त्याजितशालीनतारूपस्त्रीसमाचाराः। **दुराधयः**—दुष्टा मनोव्यथाः । **व्यवसाययन्ति**—प्रेरयन्ति ।

विधान् हि, असंवृताङ्गानिषव इव निशिताः प्रविश्य शठा घ्नन्ति । अनुरक्तसाधनः कुलाभिमानी क इव नराधिपस्त्वदन्यः कुलजां गुणानुरक्तां श्रियमात्मवधूमिव परैरपहारयेत् । देव! शुष्कं शमीतरुमग्निरिवोच्छ्रयः कथमेतर्हि मनस्विगर्हिते वर्त्मनि विवर्तमानं न भवन्तमुदीरितो मन्युर्ज्वलयति । अवन्ध्यकोपस्यापदां विहन्तुः पुंसः स्वयमेव वश्या भवन्ति देहिनः । लोहितचन्दनोचितो महारथोऽयं वृकोदरः संप्रति रेणुरूषितः पदातिश्चान्तर्गिरि परिभ्रमन् कचित् सत्यधनस्य न मानसं ते दुनोति । यः कुरूनुत्तरान् विजित्य वासवोपमः प्राज्यमकुप्यं वस्वयच्छत्, स धनञ्जयः कथमधुना तव वल्कवासांस्याहरन् न मन्युं करोति । अनया वनान्तशय्यया कठिनीकृताकृती विष्वक्कचाचितौ विलो-

---

असंवृताङ्गान्—अवर्मितशरीरान्। **अनुकूलसाधनः**—अनुकूलसहायवान्। उक्तं च कामन्दकीये-"उद्योगादनिवृत्तस्य सुसहायस्य धीमतः । छायेवानुगता तस्य नित्यं श्रीः सहचारिणी" इति । **कुलजां**—कुलक्रमागताम्, कुलीनां च । **एतर्हि**—इदानीम् । **महारथः**—"एकादशसहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च विज्ञेयः स महारथः" । **वृकोदरः**—भीमः । **अन्तर्गिरि**—गिरिष्वन्तः । **प्राज्यं**—प्रचुरम् । **अकुप्यं**—हेमरूप्यात्मकम्, वसु-धनम् । **कचाचितौ**—कचव्याप्तौ,

कथन् यमावेतौ कथं न भवान् यमं धृतिं च बाधितुमुत्सहते । पुरा यः शयनं महाधनमधिरूढः स्तुतिगीतिमङ्गलैर्विबोधितः, स भवान् स्थलीमदभ्रदर्भामधिशय्य शिवारुतैरशिवैरद्य निद्रां जहाति । यौ मणिपीठशायिनावनारतं राजशिरस्त्रजामरञ्जयद्रजः, तावद्य मृगाद्विजालूनशिखानां बर्हिषां वनेषु भवतश्चरणौ भ्रमतः । द्विषन्निमित्ता हि दशेयम्; सेयमतःसमूलमुन्मूलयतीव मे मनः । ततः प्रसीद प्रभो! विहाय शान्तिम्, विद्विषां वधाय पुनः संधेहि धाम; मुनयः खलु निस्स्पृहाः शत्रूनवधूय शमेन ततः सिद्धिं व्रजन्ति, न तु भूभृतः । यशोधना भवादृशाः, धामवतां च पुरस्सराः सुदुस्सहं निकारमीदृशं प्राप्य रतिं चेदधिकुर्वते, हन्त तर्हि हता निराश्रया मनस्विता । अथ चेन्निरस्तविक्रमः क्षमामेव सुखस्य चिराय साधनं पर्येषि, तदानीं लक्ष्मीपतिलक्ष्म कार्मुकं विहाय पावकमिह जटाधरः संजुहुधि । परेष्वद्य

विशीर्णकेशावित्यर्थः । **यमौ**—युग्मजातौ, नकुलसहदेवौ । **यमं**—नियमम् । **महाधनं**—बहुमूल्यम् । **अदभ्रदर्भाम्**—बहुकुशाम् । **अनारतं**—अजस्रम् । **बर्हिषां**—कुशानाम् । **धाम**—तेजः, वीर्यमित्यर्थः । **संधेहि**—स्वीकुरु । **निकारं**—पराभवम् । **रतिं**—सन्तोषम् । **मनस्विता**—अभिमानिता । **पर्येषि**—अवगच्छसि । **पावकं संजुहुधि**—पावके होमं कुर्वित्यर्थः;

निकृतिपरेषु, भूरिधाम्नः सर्वथा न भवतः समयपरिरक्षणं क्षमम्; अरिषु विजयार्थिनः क्षितीशा हि सोपधि सन्धिदूषणानि विदधति ।

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥"

अधिकरणे कर्मत्वोपचारः । **निकृतिपरेषु**—अपकारतत्परेषु । **समयः**—त्रयोदशसंवत्सरान् वने वत्स्यामीति संविदिति यावत् । **परिरक्षणं**—प्रतीक्षणम् । **सोपधि**—सकपटं यथा तथा । **सन्धिदूषणानि विदधति**—केनचिद्व्याजेन दोषमापाद्य सन्धिं विघटयन्तीत्यर्थः ।

विधिः—दैवम्, समयः—कालः, तयोः नियोगात्—नियमनात् । **अगाधे**—दुस्तरे । **दीप्तिः**—प्रतापः, आतपश्च । **जिह्मम्**—अप्रसन्नम् । **शिथिलवसुं**—शिथिलधनम्, शिथिलरश्मिं च । **उदस्य**—निरस्य । **उदीयमानं**—उद्यन्तम् ।

। द्वितीयः सर्गः ।

अथ तां प्रियया भिहितां गिरं गरीयसीं निशम्य, नृपं प्रति वचनमेवमुपपत्तिमदूचे वृकोदरः । "देव! यत् स्नेहमयेन परितश्चक्षुषा वीक्ष्य मानिन्यवोचत्, वचनं तद्वागधिपस्यापि नूनं विस्मयं विदधीत । विषमोऽपि पयसामाशय इव नयः कृततीर्थः सुखं विगाह्यते; किन्तु यस्तत्र कृत्यवर्त्म साधूपन्यस्यति स विशेषतो दुर्लभः । भवतेऽपि रोचतामिष्टगुणाय रुचिरार्थेयं भारती; वचनविषये वक्तृविशेषनिस्स्पृहा ननु गुणग्राहिणो विपश्चितः । नृपेश्वर! विवेकिनी मतिस्ते विपर्ययमेवं करिणी पङ्कमिवेयमेत्य कथमवसीदति । द्विषतां प्रभुशक्तिमुदेष्यतीमनीहया प्रतिपालयतां महीभुजां जननिर्वादभयादिवाचिरादपयान्ति श्रियः ।

चक्षुषा—ज्ञानेनेत्यर्थः । **वागधिपस्य**—बृहस्पतेः । **विषमः**—दुर्बोधः, अन्यत्र निम्नोन्नतः, दुष्प्रवेश इत्यर्थः । **कृततीर्थः**—कृताभ्यासाद्युपायः, अन्यत्र कृतजलावतारः । **विगाह्यते**—गृह्यते, प्रविश्यते च । **गुणग्राहिणः**—गुणपक्षपातिनः । **प्रभुशक्तिं**—कोशदण्डजं बलम् । **उदेष्यतीम्**—वर्धिष्यमाणाम् । **अनीहया**—अनुत्साहेन । **प्रतिपालयतां**—उपेक्षमाणानाम् । 'स्त्रीभिः षण्ड इव श्रियालसः परिभूयते' इति कामन्दकः ।

विक्रमहीनमापदः पुमांसमभिभवन्ति ; आपदुपेतमायतीं रहयति; निरायतेर्लघुता नियता ; न च पदमगरीयान् नृपश्रियः। तस्मादुन्नतेः प्रतिपक्षभूतां व्यवसायवन्ध्यतामलमवलम्ब्य; पराक्रमाश्रयाः समृद्धयो न हि निवसन्ति समं विषादेन । अवधिश्चेदथ प्रतीक्ष्यते, तदानीं धृतराष्ट्रसुतेन जिह्मवृत्तिना चिरमास्वादिता नरेन्द्रसम्पदः कथं सुत्यजाः। अथवा द्विषता पुनर्विहितं यद्यात्मनः पदं त्वया लब्धा, तर्हि कृतं त्वदनुजानामाविष्कृतपौरुषैर्भुजैः ; मृगाधिपः करिभिर्मदसिक्तमुखैः स्वयं हतैर्हि वर्तयते । अचिरांशुविलासचञ्चला हि लक्ष्मीः ; सा त्वभिमानधनस्य गत्वरैरसुभिः स्थास्तु यशश्चिचीषतो नन्वानुषङ्गिकं फलम् । अतः प्रमादजं तमो निर्धूय विक्रम एव मतिं कुरु ; अवेहि, ध्रुवं त्वदनुत्साहेन विद्विषां हता विपत्तयः ।"

इत्युक्तवन्तं दुष्टं द्विरदमिव दर्शितविक्रियं कोपपरीतमानसं च

आपदुपेतं—विपन्नम् । **आयतिः**—उत्तरकालः । **रहयति**—त्यजति । **उन्नतेः**—अभ्युदयस्य । **व्यवसायवन्ध्यतां**—उद्योगशून्यताम् । **पुनर्विहितं**—प्रत्यर्पितम् । **लब्धा**—लप्स्यते; लभेः कर्मणि लुट् । **कृतं**—प्रतिषेधार्थमव्ययमिदम् । **वर्तयते**—वृत्तिं करोति, जीवतीत्यर्थः। **अचिरांशुः**—विद्युत् । **गत्वरैः**—अस्थिरैः । **स्थास्तु**—स्थिरम् । **चिचीषतः**—चेतुम्-संग्रहीतुमिच्छतः । **आनुषङ्गिकं**—अनुषङ्गात् प्राप्तम्। **तमः**—मोहम्।

मरुत्सुतं महीपतिरुपसान्त्वयितुमुपचक्रमे । "भीम। विप्लववर्जिते शुचौ हृदयग्राहिण्यादर्श इव तव वाक्प्रपञ्चे विमला परिदृश्यते ते मतिः । ईदृगिदं कः प्रसभमनीदृगाशयो वक्तुमुपक्रमेत । तथापि हृदयं मे निर्णयमेवावितृप्ततया धावति । न सहसा क्रियां विदधीत; अविवेको हि परमापदां भवति पदम्। विमृश्य कारिणं हि गुणलुब्धाः सम्पदः स्वयमेव वृणते । श्रुतं भूषयति वपुः ; तस्य भवत्यलङ्क्रिया प्रशमः ; पराक्रमः प्रशमस्याभरणम् ; तस्य च नयापादिता भूषणं सिद्धिः । महात्मभिः स्पृहणीयगुणैराचरिते वर्त्मनि नियच्छतां मनः । उदेतुमिच्छता पुंसा रोषमयं धिया प्रथमतस्तिमिरमपनेयम् ; अंशुमतापि स्वप्रभया तमो निशाकृतमविभिद्य नोदीयते । बलवानपि यः कोपजन्मनस्तमसो न रुणद्धि अभिभवम्, स क्षयपक्ष इव कला ऐन्दवीः, सकलाः शक्तिसम्पदो हन्ति । यः समवृत्तिर्मार्दवमुपैति, समये तिग्मतां च तनोति, स मेदिनीपतिर्विवस्वानिव लोकमधितिष्ठत्योजसा । आयतेर्भृशमुप-

---

विप्लवेति । विप्लवेन—प्रमाणबाधेन, वर्जिते; अन्यत्र विप्लवः—बाह्यमलसंक्रमः । **वृणते**—भजन्ते; 'वृङ्संसक्तौ' इति धातुः । **नयापादिता**—नीत्या संपादिता । **रोषमयं**—रोषादागतम्। **तिमिरं**—अज्ञानम् । **अभिभवं**—आक्रान्तिम् । **शक्तिसम्पदः**—प्रभुमन्त्रोत्साहशक्तीः । **समवृत्तिः**—मृदुतीक्ष्णवृत्तिः । **ओजसा**—वीर्येण, तेजसा च । **आयतेः**—उत्तर-

कारकम्, भूरिणः कर्मफलस्य प्रसवः, द्विषतामप्यनपायि निर्वहणं नास्ति तितिक्षासमं साधनम्। अस्मासु सहजप्रेम्णा निबद्धचेतसो मानिनां प्रथमे वृष्णयोऽपि नः प्रणतिप्रवणान् विहाय न सुयोधनं सदा प्रणमन्ति। विनयादिव केचिदद्य धृतराष्ट्रात्मजमात्मसिद्धये यापयन्ति। मदोद्धतः स सुयोधनो नृपतीन् विलङ्घयन् विधास्यति तानुपजापसहान्; अणुरप्यन्तःप्रकृतीनां कोपः प्रभुमुपहन्ति; अखिलं भूधरं तरुशाखान्तनिघर्षजो हि हिनस्त्यनलः। विनयप्रमाथिनो द्विषः समुन्नतिमुपेक्षते मतिमान्; सुजयः खलु तादृगन्तरे क्वचित्; विपदन्ता ह्यविनीतानां सम्पदः।"

इत्याकुलमर्जुनाग्रजम्, नयवर्त्मानाकुलमनुशासतं युधिष्ठिरं पराशरात्मजस्तमर्थ इवाभिवाञ्छितः स्वयमभीयाय। मधुरैर्निरीक्षितैस्तिर्यञ्चश्चप्यवशानि शमं लम्भयन्तम्, तपसां सूतिम्, आपदाम-

---

कारकस्य। प्रसवः—कारणम्। तितिक्षा—क्षमा। वृष्णयः—यादवाः। सहन्त इति सहाः, उपजापस्य सहाः तान्—भेदयोग्यान्। अन्तःप्रकृतीनां—अन्तरङ्गामात्यादीनाम्। विनयं प्रमथ्नातीति विनयप्रमाथिनः, दुर्विनीतस्य।

अर्जुनाग्रजं—भीमम्। नयवर्त्म—नीतिमार्गम्। अनाकुलं—असंकीर्णं यथा तथा। पराशरात्मजः—वेदव्यासः। अभीयाय—प्राप्तः। तिर्यञ्चि—मृगपक्ष्यादीनि। सूतिं—

सूतिम्, वपुष्मन्तमिव पुण्यसञ्चयम्, सहसोपगतं तं मुनिं भूपतिः सविस्मयं ददर्श। अथासनतः स धूतारुणवल्कलाग्रो नरेन्द्र उद्यन्, ऋषिप्रवरायार्हामवहितहृदयो विधाय, तदनुमतः पश्चात् प्रशम इव श्रुतमासनमलंचकार॥

॥ तृतीयः सर्गः ॥

ततः पिशङ्गीर्जटा बिभ्राणम्, आनीलरुचिम्, तडित्वन्तमिवाम्बुवाहमुपलक्ष्यमाणम्, माधुर्यविस्रम्भभाजा कृतोपसंभाषमिवेक्षितेन, श्रुतीनां प्रसूतिम्, सुखोपविष्टं मुनिं धर्मात्मजो हेतुमभ्यागमने परीप्सुरेवमाबभाषे।

"भगवन्! निर्धूतरजाः, सवित्री सुफलस्य, अनाप्तपुण्योपचयैर्दुरापा भवतो दर्शनसम्पदेषा वीतवलाहकाया दिवः पतिताया-

---

प्रभवम्। असूतिं—निवर्तकमिति यावत्। उद्यन्—उत्तिष्ठन्। अर्हां—पूजाम्। श्रुतं—शास्त्रश्रवणम्।

कृतेति—कृता उपसंभाषा, भाषणं येन तम्। परीप्सुः—जिज्ञासुः।

सुफलस्य सवित्री—श्रेयस्करीत्यर्थः। कामान् दुहन्तीति

स्तुल्या भवति वृष्टेः। अद्य नः क्रतूनां कामदुघाः क्रियाः, यदागते भगवति जातोऽस्मि जगति बहुमानपात्रम्। लोकगुरोरात्मयोनेरिवामोघं किं न धत्ते भवतः संदर्शनम्; श्रियं वितरति; अघान्यपहन्ति; श्रेयः परिस्नौति; कीर्तिं च तनोति। चक्षुर्मे च्योतन्मयूखे न हिमद्युतावपि निर्वृतिमेति, किन्तु भवत्सन्निधावेति निर्वृतिम्। निरास्पदमिदं मे प्रश्नकुतूहलित्वम्; किं वा युष्मादृशां निस्स्पृहाणामस्मास्वधीनम्; तथापि कल्याणकरीं भवद्गिरं श्रोतुं मुखरीकरोति मामिच्छा।"

इत्युक्तवन्तमुदारचेतसं नरेन्द्रं प्रति, तज्जयोपपत्तौ द्वैपायनो मनः समाधाय गिरमुदारामित्थमभिदधे।

"भूपते! भूतिमुभयत्र यशोऽवतंसामलब्धीं चिचीषतां जनानां तुल्यरूपा बन्धुषु वृत्तिरभ्यर्हिता, विशेषेण तपोधनानाम्। तथापि

कामदुघाः—फलदा इत्यर्थः। **आत्मयोनेः**—ब्रह्मणः। **परिस्नौति**—स्रवति। **च्योतन्मयूखे**—सुधास्राविकिरणे। **किंवा युष्मादृशामिति**-न किंचिदस्मत्तो लभ्यमित्यर्थः। **तज्जयोपपत्तौ** मनस्समाधाय--युधिष्ठिरस्य जयसिद्धिमपेक्ष्येत्यर्थः। **द्वैपायनः**—व्यासः।

भूतिं—श्रेयः। **उभयत्र**—इह चामुत्र च। **चेतुमिच्छतां चिचीषताम्**—संग्रहीतुमिच्छताम्। **वृत्तिः**--व्यवहारः। **अभ्य-**

गुणौघैस्तावकीनैः प्रह्वीकृतं त्वन्निघ्नं भवति मे हृदयम्; वीतस्पृहाणां मुमुक्षूणामपि भव्येषु हि भवति पक्षपातः। किमु न तस्य राज्ञो धृतराष्ट्रस्य सुता यूयम्, न वा गुणैः सुयोधनमतीताः; यो वृथा वस्त्यक्तवान्; बलाद्वा विधत्ते मोहं विषयाभिलाषः। कथमेनं न जहात्वर्थसिद्धिः; यः कर्णादिषु संशय्य तिष्ठते; असाधुयोगा हि जयस्यान्तरायाः, पदानि च विपदां प्रमाथिनीनाम्। रिपूणां समितौ सत्यां पथश्चयुतायाम्, चिराय धर्म्यां धुरं दधानेन त्वया विपत्स्वप्यविनाशि गुणेषु रम्यमाविष्कृतं परं प्रेम। शमैकवृत्तेर्भवतो विघातमनात्मनीनं छलेन विधाय, त्वन्मतिशीलसारान् प्रकाशितवन्तस्तव कृतोपकारा इव विद्विषः। धरित्री तव भवति विक्रमेण लभ्या; विपक्षश्च वीर्यास्त्रबलैर्ज्यायान्; अतः प्रकर्षाय विधिर्विधेयः; रणे प्रकर्षतन्त्रा हि जयश्रीः। स्वगुरुः स जामदग्न्यो वीर्येण यस्यावधूतस्तदा गुणानां प्रकर्षमाधारवशं स्म वेद, स भीष्मो धनू रणे धुन्वन् कस्य मनो न भयैकप्रवणं कुर्यात्। आजाविषुसंहतीः सृजन्तं कः कोपज्वलितं वः सहेत गुरुम्।

हिता—उचिता। **यः कर्णादिष्विति**—कर्णादीन् दुर्मन्त्रिणः सन्दिग्धार्थे निर्णेतृत्वेनावलम्बत इत्यर्थः। **प्रमाथिनीनां**—उन्मूलनशीलानाम्। आत्मने हितो न भवतीति **अनात्मनीनः**--स्वस्यैवानर्थहेतुरित्यर्थः; तम्। **प्रकर्षाय**--आधिक्याय। **सृज-**

स्वसंरम्भनिरस्तरिपुधैर्यमाराधितजामदग्न्यं निरीक्ष्य राधेयं मृत्युरपि भयमसंस्तुतमाप्नोति। यया, नृप, सुदुश्चरं तपस्यामाचरता समासादितसाधनेन कपिकेतनेन दुरापमवाप्य वीर्यमुन्मूलितारः एते, तां भूरिधाम्नीं विद्यां महत्त्वयोगाय दातुमुपागतोऽस्मि ॥"

इत्युक्तवन्तं प्रसेदिवांसं तं मुनिम्, 'धनञ्जय! साधय' इत्यजातशत्रोर्वाक्यं प्रमाणयन्, विनयेनान्ते वसन्निव जिष्णुरुपाससाद। अथ वह्निकणावदाता विद्या, दिनादिरम्यादर्कस्य बिम्बात् दीप्तिरिव स्फुरत्पद्मम्, महर्षेर्मुखात् पार्थस्याननमभिपेदे। स मुनिर्योग्यतमाय तस्मै योगं च तं तपःप्रभावात् सद्यो विततार। येन तत्त्वेष्वस्य कृतेऽवभासे चिराय चक्षुः समुन्मिमीलेव। आशंसितभूरिलाभमाकारमन्तःकरणानुरूपं दधानं तं मुनिस्तपस्समाधौ नियोजयिष्यन्, "योगेनानेन विवृद्धतेजाः, गृहीतशस्त्रश्च, परेभ्यः पदवीमयच्छन्, जपोपवासाभिषवैर्मुनीनामाचारं समाचरे। गोत्रभिदः प्रसत्तये तप सुदुश्चराणि तपांसि। क्षणादिन्द्रकीलं रुचिरं

न्तं--वर्षन्तम्। **गुरुं**--द्रोणम्। **असंस्तुतं**--अपरिचितम्। **उन्मूलितारः**--उन्मूलयिष्यन्ते।

साधय--अनुतिष्ठ। **योगं**--ध्यानविधिम्। **परेभ्यः पदवीमयच्छन्**--परस्य प्रवेशमयच्छन्नित्यर्थः। **गोत्रभिदः**--इन्द्रस्य। **प्रसत्तये**--प्रसादाय। **इन्द्रकीलं**--हिमालयान्तः

शिलोच्चयं च गुह्यकस्त्वामेष नेष्यति" इति महेन्द्रसूनुं ब्रुवाणः स महर्षिस्तिरोबभूव। राजराजानुचरश्च तं मुनेरादेशमिव साक्षात्तं प्रदेशमधितष्ठौ।

स पुण्यजनः कृतानतिः, व्याहृतसान्त्ववादे जिष्णौ जातस्पृहः सख्याविव प्रसादमियाय; आशु विश्वासयति हि सतां योगः। अर्जुनेनोष्णभासेव तेन विहीयमानान्, बृहद्द्युतीन् सुमेरुकुञ्जानिव पाण्डुसुतान् तमः शनैः प्रपेदे। किंतु स शोको धैर्येण च, महर्षेर्विश्वास्यतया च, तीव्रेणारातिप्रभवेण मन्युना च तेषु मघवत्सुतस्य वीर्यवेदिषु न स्थानमवाप। वीर्यैकधाम्नस्तांश्चतुरोऽपि तदेकौघभूतं मानसमशर्म, वासरस्य यामान् ध्वान्तमिव दूरं विहाय विभावरीमिव कृष्णां प्रपेदे। सा तु तुषारलेखयाकुलितोत्पलाभे पर्यश्रुणी लोचने मङ्गलभङ्गभीरुर्न विषेहे मीलयितुम्।

पाती तदाख्यः शैलः। **गुह्यकः**—यक्षः।

पुण्यजनः—यक्षः। **विहीयमानान्**-त्यज्यमानान्। **बृहद्द्युतीन्**—विशेषवीर्यवतः, सौवर्णत्वाद्दीप्यमानांश्च। **तमः**-शोकः, अन्धकारश्च। **स्थानं**—स्थितिम्। **एकौघभूतं**—एकराशिभूतम्। **अशर्म**—दुःखमित्यर्थः। **कृष्णां विभावरीमिव**—कृष्णपक्षरात्रिमिव। **कृष्णां**—द्रौपदीं च। **लोचने** इति—अश्रुणो दृष्टचावरकत्वेऽपि तन्निपातस्यामङ्गलत्वात् तन्निवर्तक

वन्यद्विपेन निदाघसिन्धुरिव धैर्यावसादेन हृतप्रसादा राजपुत्री सगद्गदं कृच्छ्रादेवमुवाच ।

"नाथ! पङ्कभूते द्विषां छद्मनि मग्नां भूतिं नः समुद्धरिष्यन् भवानाधिच्छिदां तपसामासिद्धेरस्मद्विना मा भृशमुन्मनी भूत् । सुखस्य लिप्सया वा, अधिगन्तुं वा यशः, मनुष्यसङ्घ्यामतिवर्तितुं वा ये ह्यभियोगभाजस्तेषां समुत्सुकेव सिद्धिरङ्कमुपैति । निष्क्रियत्वात् सव्रीडमन्दैरिवाक्षैरभिर्नात्यर्थमवभासमानः कचित् त्वं स एवासि धनञ्जयः । नागैः प्रमादादालूनसटं मृगेन्द्रमिव रिपुभिराक्षिप्यमाणं त्वां योग्यतया धूरियमधिरूढा । पार्थ! विनैवोपपत्तेर्विचिन्त्यमानैरिति यैः क्रमं चेतः, तेषां तवाघानां मघवा क्रियाद्विघातम् । तदाशु महर्षेर्वचनम्, मनोरथांश्च नः सफलीकुरुष्व ।"

इति याज्ञसेन्या वाचमाकर्ण्य नवीकृतविक्रम इव धनञ्जयो भृशं दिदीपे । अथ स पुरोधसारोपितहेतिसंहतिः पुरः पश्यन्निव वि-

---

निमीलनं सा न चकारेत्यर्थः । **वन्यद्विपेनेत्यत्र** वन्यग्रहणमुच्छृङ्खलत्वद्योतनार्थम् ।

अभियोगभाजः—अभिनिवेशवन्तः । **आलूनसटं**—आक्षिप्तकेसरम् । **योग्यतया**—निर्वाहकतया । **विनैवोपपत्तेः**—कारणाद्विनैव ।

याज्ञसेन्याः—द्रौपद्याः । **पुरोधसा**—धौम्येन । **आरोपि-**

द्विषः, क्रियामाभिचारिकीं गतो मन्त्र इव रम्योऽपि भीषणं बभार वपुः । अरीणां दृष्टिगोचरमगतौ महेषुधी, निशितौ निस्त्रिंशौ, परैरविलङ्घ्यविकर्षणं कार्मुकम्, रत्नोज्ज्वलं कवचं चोद्वहन्, शिवमलकाधिपभृत्यदर्शितमुर्वीधरस्य वर्त्म गच्छन्, तपोभृतामुद्ग्राष्पदृशां हृदयान्यर्जुनः क्षणं समाविवेश ॥

। चतुर्थः सर्गः ।

ततः स जनप्रियः पाण्डवो भुवमुपजनमुपाससाद । विनम्रेण शालिप्रसवौघेन शालिनीः, अपेतपङ्काः स उपायनीभूतशरद्रुणश्रियः पश्यन् स्थलीरुपसीम ननन्द । शनैः शनैः शान्तरयेण शिथिलत्वं गच्छता वारिणा कृतोर्मिरेखम्, तरङ्गितक्षौमविपाण्डु स निरीक्ष्य समुद्रयोषितां सैकतं रेमे । आजन्मनः पशूनां बन्धु-

---

तेति—आरोपिता—समन्त्रमाहिता, हेतिसंहतिः—आयुधकलापो यस्य सः । अभिचारः—परहिंसा प्रयोजनं यस्यास्तां **आभिचारिकीम्** । **महेषुधी**—महानिषङ्गौ ।

उपजनं—जनसमीपे । **उपसीम**—ग्रामसीमासु; विभक्तयर्थेऽ-

भूतान्, वनेषु गृहाश्रयं प्रेम बिभ्रतः, आर्जवे गोभिः कृतानुकारानिव स्थितान् स गोपानुपधेनु ददर्श; ददर्श च भृशं सपुष्पहासा आश्रममण्डपोपमा जनैरनिन्द्यकर्मभिर्वृता निवेशवीरुधः। ततः स शरद्गुणालोकने लोलचक्षुषमर्जुनं यक्षः संप्रेक्ष्य, वाचमेवमचोदितोऽप्युवाच; न हीङ्गितज्ञोऽवसीदति सत्यवसरे समुपनते।

"पार्थ! फलैर्जगत् कृतार्थयन्ती, प्रसन्नसलिला, शिवाया नियतेरायतिरिव शरदियं पृथूकरोतु ते जयश्रियम्। परिणामरम्यता सस्यम्, अनौद्धत्यं नदीः, अपङ्कता च महीं सपद्युपैति; संप्रति नवैर्गुणैः घनागमश्रियः संस्तवस्थिरमपि तिरोहितं प्रेम। नास्मिन् विशदाः पतन्ति बलाकाः काले; न च धृतेन्द्रचापाः पयोदपङ्क्तयः; तथापि नभः परां श्रियं पुष्णाति; न रम्यमपेक्षते हि गुणमाहार्यम्। अम्भोजपलाशशोभया विभिन्नम्, त्विषा मृणालिनीनामनुरञ्जितम्, स्फुरच्छालिशिखाभिः पिशङ्गितम्, द्रुतमहिद्विषो धनुष्खण्डमिव पयः शिवमपदिश्य सिताम्बुदच्छदैस्तिरोहितातपे सान्तरवारिशीकरैः सरोजवायुभिस्तितान्तरे नभोवर्त्मनि धावतां सितच्छदानाममीषां रुतैर्ग्रथिताः, वारिदोपरोधनिर्मुक्ताः परस्परालापं प्रकुर्वत इवामला दिशः। जगदेकपावनी गवां समितिरसौ, वत्सैर्व्रजोपकण्ठमुपेयुषी, आहुतिरिव मन्त्रैः संहिता समग्रां द्युतिमुपैति। मृगीकदम्बकमिदं जिघत्सामपहाय सुरक्तगोपीजनस्य गीतनिस्स्वने कृतावधानं न सस्यमभ्येति।"

इति कथयत्येव तस्मिन् यक्षे, विगलितजलभारशुक्लभासामम्बुमुचां निचय इवाथ नगाधिराजो नातिदूरात् ददृशे॥

। पञ्चमः सर्गः।

अथ स जिष्णुः, जयायेव मेरुमहीभृतो नभो विलङ्घयितुमिव

व्ययीभावः। **गृहाश्रयं प्रेम**—गृहाभिमानम्। **निवेशवीरुधः**—गृहगुल्मिनीः।

शिवायाः—कल्याणकारिण्याः। **नियतेः**—दैवस्य। **नवैर्गुणैः**—पूर्वोक्तैः शरद्धर्मैः। **आहार्यं**—आरोप्यमाणम्। **अहिद्विषः**—वृत्रशत्रोरिन्द्रस्य, **द्रुतं**—विलायितम्, **धनुष्खण्डमिव**

स्थितम्, शिवं पयः—रम्यं सलिलम्। **अपदिश्य**—व्याजीकृत्य। **सितच्छदानां**—हंसानाम्। **संहिता**-योजिता। **जिघत्सां**-भक्षितुमिच्छाम्। **सुरक्तः**—मधुरकण्ठः, यो गोपीजनः तस्य।

चोच्छ्रितम्, क्षितिनभस्स्वर्लोकवासिभिरदृष्टपरस्परैः कृतनिकेतनम्, शम्भुना स्वविभुतां प्रथयितुं प्रतिनिधिमिव जगतामभिनिर्मितम्, नितम्बविलम्बिभिरुदितपक्षमिवाम्बुदैः, उच्छ्रितैरुपलरोधविवर्तिभिरम्बुभिः धृतसितव्यजनामिव सानुषु जाह्नवीमुद्धतां दधतं हिमाचलमभिययौ। अथ नगस्य विलोकनेन विस्मितमानसं धनञ्जयं प्रति धनपतेरनुचरः प्रियमिदं जगाद वचनम्; मुखरता समुपनते ह्यवसरे विराजते।

"हिमगौरैः शिरोभिर्घनवर्त्म सहस्रधा कुर्वन्निवाचलाधिप एष विलोकितः प्रजानामह्नसां संहतिमलं विहन्तुम्। वीतजन्मजरसं परं ब्रह्मणः पदमुपैतुमिच्छतां तमोऽपहादागमादिव भवच्छेदिनी मतिरितः संभवति। अद्रावेतस्मिन्, अपनिद्रचूतगन्धसदृशं मदजलसेकजमामोदं दधानः सुरकरिणां कपोलकाषो लीनालिरकालेऽपि कोकिलान् मदयति। ईशार्थमम्भसि तपश्चिराय चरन्त्या

उच्छ्रितैः—उत्पतितैः। उपलेति—उपलरोधेन—शिलासंघट्टनेन; विवर्तिभिः। मुखरता—वाचालत्वम्।

तमोऽपहात्—अविद्यानिवर्तकात्। भवं संसारं छिनत्तीति भवच्छेदिनी। अपनिद्रचूतगन्धसदृशम्—फुल्लाम्रपुष्पगन्धसदृशम्। कपोलकाषः—कपोलानां कषणस्थानम्। लीनालिः—

भवान्याः पाणिराबद्धमङ्गलमहौषधिः पिनाकभृता सलीलमत्र स्वस्तोरगप्रतिसरेण करेणागृह्यत। नास्मिन् रम्या नवद्युतिरपैति कदाचिदपि शाद्वलेभ्यः। अनुदिनमत्र श्यामीभवन्ति नलिनीवनानि। विचित्रैः कुसुमस्तवकैराचितानां शाखिनामत्र न पल्लवानि परिणमन्ति। पार्थ! भव्योऽसि त्वम्; मुनेः शासनेन क्षात्रधर्मे स्थितस्त्वमिहाप्रमत्तस्तपस्य; विधौ सत्यपि हितार्थकरे, न श्रेयांस्यन्तरायैर्विना सुखेन लभ्यानि। इन्द्रियाश्वास्तव मा नामापथहरा भूवन्; सति संतापे शिवस्ते शिवां प्रसक्तिं दिशतु; लोकपालाश्च तपोबलं ते रक्षन्तः कल्याणीं समधिकफलां क्रियासुस्ते क्रियाम्।"

इति हितं प्रियं चोक्त्वा स्वं धाम सपदि गतवति राजराजस्य भृत्ये, पृथासुतः किमपि सोत्कण्ठं प्रदध्यौ; सद्भियोगो हि भृशमरतिं सद्यः सतां संधत्ते। स लक्ष्मीवान् स्वचेतसाशंसितम्, उन्मुखेन फलेनानेकेनाविरहितं शैलं तमकृशं पौरुषमिव स्वमभ्यासासाद॥

संसक्तभृङ्गः। तपस्य—तपश्चर्यां कुरु। प्रसक्तिं—प्रवृत्तिम्। क्रियासुः—कुर्वन्तु; करोतेराशिषि लोट्।

संधत्ते—करोतीत्यर्थः। स्वचेतसाशंसितम्—प्राप्तुमिष्टम्।

। षष्ठः सर्गः ।

अथ स रुचिराकृतिः पुरुहूतसुतः कनकसानुं तं परमः पुमान् पततां पतिमिव त्रिपथाभिमुखमारुरोह । तत्र पवनेरिताकुलशिखा भूरुहो मधुकरनिक्वणैर्विहितजयध्वनयो वन्दिन इवानिन्द्यास्तमिन्द्रसुतमवचकरुः कुसुमैः । अवधूतपङ्कजपरागाः, जाह्नव्यास्तनुसलिलभिदः, सुखा मरुतश्च सुहृदः सखायमिवाभिमुखमेत्य तं परिरेभिरे । अभितःस्फुरच्छफरीचारुदृशः सैकतवतीः, ललिताः सखीरिव सुरनिम्नगामुपयतीः स सरितस्ततार । गिरेर्मूर्ध्नि पुष्पफलनम्रशिखैस्तरुभिः परितः परिष्कृततलाम्, शुचिं वनान्तभुवं स मनसः प्रसत्तिमिवासासाद । फल्गितोरुभूरुहः, पुष्पितलतावितितिः, विविक्तवनोऽयमचलस्तपसे तत्राधिवस्तुमर्जुनस्य धृतिमचलामातनोत् ।

अथ तत्र धियं प्रणिधाय विधिना मुनितां दधतस्तस्य पुरातनमुनेस्तदसुकरं तपो न श्रममादधौ; आत्मवतां हि किमिवावसादकरम् । धृतेन्द्रियशमैकसुखः, गुणैः शुचिभिरघमयं तमः शमयन्, विमलस्तपोमिः प्रतिवासरं स शीतरुचिरिव कलाभिर्ववृधे । प्रयतः

तं कनकसानुं—इन्द्रकीलम् । अवचकरुः—अभिववृधुः । मनसः प्रसत्तिमिव—मूर्तं मनःप्रसादमिव । असुकरं—दुष्करम् । अवसादकरं—अशान्तिजनकम् ।

स प्रणतिभिर्जपैर्मननेन च दिवस्पतिं समुपेयिवान् । हरिन्मणिनिभः स चाभिषवणेन जनिता जटाः शिरसा वहन्, अरुणदीधितिभिः परिमृष्टमूर्ध्नस्तमालतरोर्यया वपुषाम् । धृतहेति रप्यनिष्ठुरमतिर्विरजाः स मुनीन् शुचिभिश्चरितैरधरयन् मृगानपि रजयाञ्चकार । गुणाः कमिव हि न रमयितुमीशते; अचण्डगतिमनुकूलपातिनं सुगन्धि पवनमभितः किरता, अवधीरितार्तवगुणमंशुमतो रुचां निचयं सुखस्पर्शतां नयता, नवपल्लवाञ्जलिभृतो बृहत्तरून् प्रचयेऽवनतिं गमयता, शयनीयतामुपयतीं वसुधां मृदुभिस्तृणैः प्रतिनिशं स्तृणता, अपेतजलदात् नभसः पतितैरपां पृषतैः रजश्च शमयता तपसा स गाढकृशः परिचर्यया दयालुनेवानुजगृहे । स धीरः फलाय महते विकसत् शिवं निमित्तकुसुमं तदवेक्ष्य पुरो न विस्मयवशं जगाम; न ह्यनुभावगुणो वशिनां धैर्यं निहन्ति ।

दिवस्पतिं—इन्द्रम् । अभिषवणेन—स्नानेन । रजयाञ्चकार—रमयामास । सुगन्धिमिति—गन्धस्येत्वे तदेकान्तग्रहणेऽपि कवीनां निरङ्कुशत्वात् समासान्तः । ऋतुरस्य प्राप्तः—आर्तवः, स चासौ गुणः तिग्मत्वरूपः, सोऽवधीरितो यस्य तम् । प्रचये—पुष्पावचयप्रसङ्गे । स्तृणता—आच्छादयता । दयालुनेवेत्यस्य तपसेत्यनेन संबन्धः । शिवं—सुखदम् । निमित्तमेव कुसुमम् ।

वासरैः कतिपयैरेव पार्थिवस्य सुकृतैः कृतम्, तदनन्यभवं वैभवमुपलभ्य विह्वलधियो वनेचरा वसतिमुपतस्थुः शतयज्वनः । ते चानुमतप्रवेशाः प्रविश्य गोत्रभिदो भवनं तस्मै विहितानतयः कथयाम्बभूवुरेवम् । "भगवन्! अनवः कोऽपि पुरुषः शुचिना वल्कलेन वीतवपुः, तिमिरच्छिदामन्यतम इव जगत् तपन्, जयं महान्तं कमप्यवाप्तुं तपस्यति गिरौ भवतः । भीषणभुजङ्गोपमभुजः स पृथु, विद्विषां भयविधायि धनुर्बिभर्ति । सच्चरितान् मुनीन्द्रांश्च स चरितेनामलेनातिशेते । तस्य तपोमहिम्ना मरुतः शिवाश्चलन्ति; पृथ्वी नवतृणा भवति; विमलं नभो विराजते; विक्षुब्धे सति रजस्यपां संभवति वृष्टिः; किं बहुना; गुणसम्पदास्यानुगुणतां गमितो भूतगणः सेवामिवास्य कुरुते । मृगाश्च, गुरुमन्तेवासिन इवेतरेतराननमिभवन्तस्तमुपासते; पुष्पावचये तरवश्च विनमन्ति । स भवतेव तेन नगः परवान् संवृत्तः । स पुमान् ऋषिवंशजो वा; अथवा दैत्यकुलजः; महति यदि वा भूभृतामन्वये जातः; भवद्धनेषु तपश्चरतो न वयमस्य गतिं प्रभवामो निरूपयितुम् । वयमल्पधियो वनेचराः; वचनमिदं नः श्रुत्वा निपुणमतयो भवन्तः प्रमाणम् ।" इति मघवा स्वमनसः प्रियं तपः

अन्यस्य न भवतीति—**अनन्यभवम्**। **तिमिरच्छिदां**—सूर्यादीनाम् । **भवतो गिरौ**—इन्द्रकीले । **भूतगणः**—पृथिव्यादिपञ्चकम् ।

प्रियसुतस्य तत् गुह्यकगणादधिगम्य समुदितं हर्षं जुगोप; श्रियः प्रभवतां हि नयवर्त्मगाः ।

अथेन्द्रश्चित्तं प्रणिधाय, विदितेऽपि स्वभक्ततया तस्मिन्, अपूर्व इव, नियमस्थिरतामस्योपलब्धुकामः सुरसुन्दरीराहूय वचः इत्यभिदधे । "अप्सरसः! लोकविजयाय सुकुमारम्, अमोघम्, अतिदूरगम्, सूक्ष्ममेकं चित्तभुवः कतमद्व्ययमिवापरमस्त्रम् । पुरा जगति बहुधा विप्रकीर्णा समुपहृत्य कमनीयतां भवतीर्विदधता भूतसृजा जनतायाः सुरलोकयात्राप्रवणता सुतरामुपपादिता । तदद्य कलासु कुशलैः सचिवैः सहिता यूयमिन्द्रकीलमुपेत्य, पुंसस्तस्य तपो विघ्नयत; वशीकृतवीतरागमनसां वः सुखा नन्ववजितिः सुखसङ्गिनः । विमृश्यतामेतत्; स द्विषतां वधेन विजयातिशयमभिलप्स्यति; स तथाविधो विधिर्न हि भवमुक्तये भवति; क्व शरासनधारणम्, क्व च विमुक्तिपथः । मा च तस्मात् पृथुधाम्नोऽपि मुनेरन्यस्मादिव विकृतिः शङ्कचतां भवतीभिः । स्वयशांस्यवतां हि विक्रमवतां श्रियो न वधूष्वधानि विमृशन्ति ।" इति चारुतरमाशंसितसम्भावनाभिः सुराधिपस्यादेशमभिमुखमवाप्यामर्त्यवधू-

---

प्रभवतां—प्रभूणाम् । **नयवर्त्मगाः**—नीतिमार्गानुसारिण्यः । **उपलब्धुकामः**—परीक्षितुमित्यर्थः । **सचिवैः**—गन्धर्वैः । **विधिः**—अनुष्ठानप्रकारः । **विकृतिः**—कोपादिविकारः । **अभिमुखं**—

समूहः परां द्युतिं लेभे ; अधिकृतस्य संभावना हि तेजस्तनोति । अथ सुराधिपाय विधाय प्रणतिं सद्मनः प्रस्थिताः, स्तनभरेणानमिताङ्गीः, प्रीतिभाजः सुरसुन्दरीः स्तिमितमक्ष्णां सहस्रमप्यमरभर्तुर्न द्रष्टुमलं बभूव ॥

। सप्तमः सर्गः ।

अथ त्रिलोकभर्तुः सरथगजैः सचिवैर्गुप्तानां सुराङ्गनानां प्रस्थानमलघुविमानरन्ध्रेषु भिन्नः संमूर्छन्नभिदधे मृदङ्गनादः । सोत्कण्ठैरमरगणैः प्रकीर्णात् मधोनः पुरात् प्रस्थिताः सुररमण्यो गन्धर्वबलानि च दुरुपसदादहिममयूखमण्डलस्य पर्यन्तात् सुदूरमुपेत्य, रम्योर्मिमाशानामेकवेणीमिवोपरचितां त्रिदशनदीं ययुः । आमत्तेन भ्रमरकुलेनोद्धूतरजांसि पङ्कजानि धुन्वन्, गगननद्यास्तरङ्गैः शीतश्च मातरिश्वा सुरकान्तानां तासां संतापं विरमयति स्म । शीकरपातैः शमितपरिश्रमाः पयोदाः सुराङ्गनानां प्रहादं दिशन्तो बहु-

---

समक्षम् । सद्मनः—इन्द्रभवनात् ।

त्रिलोकभर्तुः—इन्द्रस्य । अलघुषु—महत्सु, विमानरन्ध्रेषु—विमानानां कुक्षिकुहरेषु । भिन्नः—प्रतिध्वानैरनेकीभूतः । संमूर्छन्—व्याप्नुवन् । दुरुपसदात्—दुस्सहात् । आशानां—दिशाम्, तदाख्यानां स्त्रियामिति च गम्यते । शमितः परिश्रमः यैस्ते ।

मतिमाययुः । कार्यसिद्धाविवितिकरणीयतामालपन्ती सहस्राक्षस्य ध्वजिनी विलङ्घ्य नभोवीथीं जीमूतैः पिहितसानुमिन्द्रकीलमासासाद ।

विलासिनीनां मुखनलिनैराकीर्णा, समुद्धूतविशदातपत्रफेना, तूर्यध्वनितगभीरमापतन्ती सा वाहिनी, नभोनदीव शिरसि तस्य भूभृतो रेजे । अथ वृत्रारेः सचिवास्ते च्युतकुसुमाचितामविरलशाद्वलामुपभोगक्षमारण्यां च धरित्रीमध्यूषुः । किसलयशालिनीनां लतानां सम्पत्तिः, सामोदाः कुसुमतरूणां श्रियः, विविक्ताः प्रदेशाश्च तत्रामराङ्गनासंभुक्ताः साफल्यं ययुः ; सा खलु लक्ष्मीः, या हि परेषामुपकारायास्ते । स च क्वचित् त्रिदशवधूजनः क्लान्तोऽपि, पुरस्तात् लीनाहिश्वसितैर्विलोलपल्लवानां चन्दनानाम्, अविनीतैरावृतानां सेव्यानां संपर्कमिव परिहरति स्म । अध्वश्रमातुरैर्वधूजनैः सेवितानाम्, शाखास्वासक्तकमनीयपरिच्छदानाम्, निवेशनविभागैश्च परिष्कृतानां वनपादपानां जज्ञे पुरोपवनजा लक्ष्मीः ॥

वाहिनी—सेना नदी च । भूभृतः—पर्वतस्य, राज्ञ इति च गम्यते । अध्यूषुः—अधिवस्थुः । लीनानां—संश्रितानाम्, अहीनां—सर्पाणाम्, श्वसितैः निःश्वासैः । सेव्यानामिव—प्रभूणामिव । निवेशनविभागैः—आवसतिकावच्छेदैः । जज्ञे—जाता ।

। अष्टमः सर्गः ।

अथ सुराङ्गनाः स्वमायया सद्यः शैलतटे कृतैर्मन्दिरैरुज्ज्वलम्, ज्वलन्मणिगोपुरं व्योमसदां पुरं विहाय विजिहीर्षया वनं ययुः । करप्रचेयानि घनोद्भिन्नानि कुसुमानि बिभ्रतः काममपहाय शाखिनः पुरस्सुरसन्दरीजनैरभिसस्रे; गुणेषु यथोत्तरेच्छा हि कामिनः । स्फुरन्नखांशुमञ्जरीभृतो विलासिनीनामलक्तारुणपाणिपल्लवसहिता बाहुलता वनालयो विलेपनामोदहृताः सिषेविरे । सानुवर्त्मनो गुरुखेदमन्थरं निर्गच्छन्तीनां सुराङ्गनानां समेऽपि स्थले यातुमनीश्वरान् नवपल्लवकोमलान् मदादिव पदे पदे प्रस्खलतश्चरणान्, घर्माम्बुकणैः समन्ततश्चितानि तुषारानुलिप्तैः सरोरुहैः समानकान्तीनि मुखानि च सविस्मयं रूपयतो गन्धर्वानिदंप्रथमतयैव विवेशेक्षणादरः ।

अथ स्फुरद्भिर्मीनैर्विधूतपङ्कजा, तीरेषु विपङ्केषु स्खलितोर्मि-

---

व्योमसदां पुरं—दिवौकसामर्थे तात्कालिकतया निर्मितं नगरम् । विजिहीर्षया—विहर्तुमिच्छया । करप्रचेयानि—हस्तग्राह्याणि, अनुच्चानीति यावत् । अभिसस्रे—अभिसृतम्; भावे लिट् । उत्तरमुत्तरं यथोत्तरम्; वीप्सार्थेऽव्ययीभावः । बाहुलता इति कर्म । वनालयः—वनभृङ्गाः कर्तृभूताः । स्फुरद्भिर्मीनैरिति सदृङ्मुखवीक्षणोक्तिः । स्खलितोर्मिमालेति

माला, कलहंसनादिनी सुरापगा पयोऽवगाढुं सुरवधूः समाजुहावेव । पर्यन्तगतमीनपङ्क्तीर्विधूय मरुत्वतः सचिवैः पुरो विगाढा अपः सभयाः सुरसुन्दरीजनाः पश्चात् कथंचित् प्रपेदिरे । "किमिमे विलीनषट्पदे सरोजपत्रे, आहोस्विद्विलोलदृष्टेरिमे विलोचने; किंनु निश्शब्दनिश्चलमिदं द्विरेफवृन्दम्, किंस्वित् नतपक्ष्मलाक्ष्याः शिरोरुहाः; किन्न्विदं विकचं पङ्कजम्, किंस्विदगूढहासेन स्फुटदन्तकेसरं मुखम्" इति वितर्कमुग्धा योषितो नलिनीवने प्रलीनां सखीं सुचिरेण विदांबभूवुः । विहतपत्रलेखाः, निरस्तालक्तकाधराः, निरञ्जनाक्षीश्चापि श्रियमतुलां बिभ्रतीर्निरीक्ष्य रामा वपुषैवाकृतिरलङ्कृतेति बुबुधुर्नभश्चराः । इत्थं विहारानन्तरं चन्दनरसैः संक्रान्तैराहितवर्णभेदम्, विच्छिन्नभूषणमणिप्रकराणामंशुभिश्चित्रम्, बद्धोर्मि च तत् सुरसिन्धोः सलिलं नाकवनिताभिः परिभुक्तमुक्तां शयनीयलक्ष्मीं बभार ॥

हस्तसंज्ञोक्तिः । कलहंसनादिनीति वाग्व्यापारोक्तिः । मरुत्वतः सचिवैः—गन्धर्वैः । पुरः—प्रथमतः । विगाढाः—प्रविष्टाः । प्रपेदिरे—जगाहिरे । विलोलदृष्टेः—चञ्चलाक्ष्याः । विदांबभूवुः—विविदुः, निश्चिक्युरित्यर्थः । श्रियं बिभ्रतीरिति शोभाकारणाभावेऽपि शोभमाना इति भावः ।

अथ भानुमान् पिपासुरंशुपाणिभिरतीव पद्मजं मधु रसयित्वा, क्षीबतां गत इव क्षितिमेष्यन् लोहितमुवाह वपुः । खौ सति सामि मज्जति समुज्झितपूर्वः, मुक्तमूललघुः, नभसि पश्चिमे संभृतसान्द्रश्च खिन्नजिह्म इव न रश्मिसमूहो विरराज। विवस्वान् पश्चिमगिरिसानुषु स्थितान् भूरुहान् नितान्तपिशङ्गैर्मृदुकरैरवलम्ब्य किमस्तशैलमाहनम्, किं नु महीम्, किंस्विज्जलनिधिमाविवेशेति शङ्का समजनि प्रेक्षकाणाम् । साञ्जलौ, नतमूर्ध्नि, स्वप्रवणचेतसि च सत्यपि जने, सन्ध्यया चापलेन विरमन्त्या विहाय तत्प्रेम दुर्जनस्यानुविदधे प्रकृतिः । एकतां गतस्येव महतोऽपि न

मधु—मकरन्दम्, तदेव मधु—मद्यम् । **अतीव रसयित्वा**—अतिमात्रं पीत्वा । **क्षीबतां**—मत्तत्वम् । **क्षितिमेष्यन्**—अधस्तादागमिष्यन् ; यथा मत्तः क्षीबतया क्षितौ लुठति रज्यते च तद्वदिति भावः । **सामि मज्जति**—अर्धास्तमिते । **समुज्झितपूर्वः**—त्यक्तपूर्वदिक्कः, अन्यत्र त्यक्तपूर्वजनः । **मुक्तमूललघुः**—मुक्तं त्यक्तप्रायम्, मूलं—आश्रयभूतो रविः, अन्यत्र स्वामी च । **पश्चिमे** नभसि-पश्चिम नभोमार्गे, अन्यत्र क्वचिन्नीचस्थले। **खिन्नजिह्म इव**-दीन इवेति च ध्वन्यते । **साञ्जलाविति** वाक्येन यथा दुर्जनप्रकृतिः स्निह्यन्तमपि जहाति तद्वत् संध्यापि सेवमानं जनमहार्सीदिति गम्यते । **एकतां**—अभेदम्, गतस्येव ; तमोव्याप्त्या तथा प्रतीतेरियमुत्प्रेक्षा । **महतोऽपि**—शैलादेरपि ।

विवेकः कस्यचिदुपलेभे ; भुवनानां विशेषाः पतितेन भास्वता तदानीमात्मनीव निदधिरे । वधूभिः सहाभेदमिच्छतामपि चक्रवाकविहगानां मिथुनानि वियोगमापुरेव ; कालनियोगो हि न खलु लङ्घ्यते । रात्रिच्छायामलिनानि, विरहितविकासानि विहायपङ्कजानि, स्पष्टतारकं श्रीरियाय नभः ; सर्वो निरापदि हि वस्तुमिच्छति ।

ततः शैलेन रुद्धवपुषः सितरश्मेर्हिमगौरं खे नीलनीरजनिभे निपतत् करजालम्, पयसि वारिधेः पतत् गाङ्गमम्भ इव रराज। मन्दरभिन्नः क्षीरसिन्धुरविरलोच्चतरूणि काननानीव, शशधरेण प्रेरितः करौघः संहतान्यपि तमांसि नुनोद । वध्वा सहातपे धृतिमता चक्रवाकविहगेन न हिमरश्मेः किरणाः सेहिरे ; दुःखिते हि मनसि सर्वमसह्यं भवति । यामिनीवनितया लसदंशुजलौघः स्फुटचिह्न इन्दुः, [illegible]याभिषेकं विधातुं सोत्पलो रज-

---

विवेकः—भेदः । **कस्यचित्**—कस्यापि पदार्थस्य । **नोपलेभे**—न गृहीतः । **भुवनानां**—भुवन स्थपदार्थानाम् । **विशेषाः**—भूधरादिभेदाः । **निदधिर इव**—निहेता इव । **अभेदं**—अवियोगम् । **कालनियोगः**—दैवाज्ञा । **स्पष्टतारकं**—भासजनक्षत्रम् ।

शैलेन रुद्धवपुषः—उदयगिरिणा तिरोहितमण्डलस्य । **सितरश्मेः**—इन्दोः। **संहतान्यपि**—सान्द्राण्यपि ।

तकुम्भ इवोदासे। अनूनमप्योजसा न खलु जयश्रीर्नूनमसहायमुपयाति; यद्विमुरनङ्गः शशिमयूखसखः सन्नेव विजयि चापमाददे ।

अथ स्वय स्वादितः, एधितोत्साहं लम्भितः, सह प्रियतमैः पीतश्च प्रतिपदमासवः प्रमदानां रसे नैकरूपत्वमिव भेजे। चित्तस्य निर्वृतिविधायि विविक्तं स्थलम्, मधुजनितो मदः, मन्मथः, चन्द्रिका, दयितसंयोगश्चेत्येते प्रमदानामुपर्युपरि प्रेम कामपि मुवं नयन्ति स्म ॥

। दशमः सर्गः ।

अथ निशावसाने ताः सुराङ्गनाः स्वावयवलावण्येनैवाधिगतमण्डनश्रियः प्रकटितरम्यहावाः सुरपतिसूनोर्विलोभनाय जग्मुः । विस्मयाकुलास्ताः शुचिसिकतासु क्षितिषु जिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि पदानि सचकितमिव ददृशुः । गगनविसारिभिः,

---

उदासे—उत्क्षिप्तः। अनूनं—संपूर्णमपि।

स्वयं स्वादितः—आदौ स्वयमेवादाय पीतः। एधितोत्साहं—वर्धितोत्साहं यथा तथा। लम्भितः—प्रियतमैर्ग्राहितः।

प्रकटितरम्यहावाः—प्रकाशितमनोहरविलासाः। एकं सा-

लोचनाभिरामैः शशधर इवांशुभिः परीतः स एकसानुसञ्चापि महीधरस्य तस्य शिखरनिचयं सकलमप्यावृण्वन्निव, विधृतपिशङ्गबृहज्जटाकलापः, सुरसरित्कूले परं तपश्चरन्, शिखासमूहैरुपवेदि विततो हविरभिलषन् जातवेदा इव च ताभिर्ददृशे। स चिरनियमकृशोऽपि शैलसारः, शमनिरतोऽपि प्रकृत्या दुरासदः, वने निर्जनेऽपि तिष्ठन् सपरिवार इव, मुनिरपि त्रिलोकभर्तुः समानतेजाश्चासीत्। अथ कृतकविलोभनं विधित्सौ सुरयुवतिजने हरिसूनोर्दर्शनेन चित्तजन्मा प्रसभमवातरत्; मधुरा हि यौवनश्रीर्बलान्मनो हरति ।

अथ गन्धर्वैर्वधूनिदेशात् सपदि ध्वनितवल्लकीमृदङ्गैर्वने वियति च यथायथमृतुगणस्य व्यधायि संविधानम्। ततो नातिचिरादेव नभः सजलजलधरं विरेजे; कदम्बवनानां वायौ, मदमधुरे शिखण्डिनां निनादे च मनः सत्यभिहरति, पृथग्जन इव जिष्णुर्न मात्रयापि धृतेश्चचाल; महतां हि न समाधिभङ्गः सुकरः। समदानां शिखिनां रुतानि हंसनादैः, कुमुदानां वनानि कदम्बपुष्पवृष्ट्या च

नुः सञ्च—स्थानं यस्य सः—एकसानुसञ्चा, एकदेशस्थितोऽपीत्यर्थः। उपवेदि—वेद्याम्। दुरासदः—दुर्धर्षः ।

वधूनिदेशात्—अप्सरसां नियोगात्। संविधानं—आविर्भावः। नातिचिरादेवेत्यादिना प्रावृट्कालः सूच्यते। हंसनादै-

समेत्यातिशयिनीं श्रियं जग्मुः; गुणमहतां परस्परयोगो हि महत्तराय भवति गुणाय। अविरलफलिनीवनप्रसूनो विरलतुषारकणश्चिराय तुषारकालश्च गुणमसमयजं लेभे; लोध्रसमीरणे तदानीं हर्षं सति जनयति, न पाण्डुसूनुरुपययौ विकृतिम्; जिगीषतां न हि नयाच्चलति चेतः। सुरभिमुखस्य हिमागमान्तस्य च शंसी, तनुतुहिनः, स्मरैकबन्धुः शिशिरश्च सपदि समाययौ। तदा न परः कमपि प्रभवति विजेतुम्, यदा तिष्ठत्यात्मरक्षायै जितेन्द्रियता; तथाहि; आरूढकुसुमनगवनः क्वणदलिकुलो निर्जितभुवनः पुष्पमासो न विजये नयं लेभे। विहितमल्लिकाविकासो निदाघकालस्तदानीं 'ऋतुभिरितैः सममवधीरितस्य मुनिना तव कथमिव मान्यता भवित्री' इति स्म मधुं स्मयत इव। बलवदपि मिथो विरोधि बलं नैव प्रभवति विपक्षनिर्जयाय; यत् स ऋतुगणो भुवनपरिभवी क्षणमपि तं न तदानीमुन्मनीचकार। गन्धर्वैः कृतं श्रुतिसुखमुपवीणितम्, फलकुसुमादिभिरविरलैर्लोध्रनैर्मनोहारिणः कालाश्च हरिसूनोर्न विक्रियां कर्तुं प्राभवन्; किन्तु त्रिदशवधूष्वेव मनोभवं वितेनुः; दुरधि-

---

रित्यादिना शरत्कालः सूचितः। अविरलफलिनीत्यादिना हेमन्तर्तोः समागमोऽभिहितः। विरलतुषारेत्यादिना शिशिरर्तुः कथ्यते। आरूढेत्यादिना वसन्तकालोऽभिधीयते। विहितमल्लिकेत्यादिना निदाघकालः कथ्यते। स्मयते स्मेव—जहासेव।

गमा हि प्रयोजनानां गतिः। सुरवनिताभिः सकरुणमभिहितम्; निरस्ता त्रपा; तदभिमुखमश्रु च विमुक्तम्; अभिसारणे प्रियमनुकूलमनुनेतुमियती हि भूमिरबलाजनस्य। प्रकृत्यैवालसपदमनोरमं जितकलहंसवधूगति तासां प्रयातं वा, कुसुमशरेषुपातमोहादस्फुटार्थपदाकुलः सल्लापो वा, पर्यायोन्नमितभ्रूलतं वीक्षितं वा स्तिमितसमाधिशुचौ पृथातनूजे नार्थवद्बभूव; अमर्षे सति ज्वलति, महतां मनस्सु न ह्यवकाशं सुखाभिलाषो लभते।

स्वयमखण्डेन तपसा शतमखमेवं संराध्य, हरिसुते परोच्छित्य, लभ्यां सति लक्ष्मीमभिलषति, प्रणयस्य विहत्या ध्वस्तरुचयः सगन्धर्वास्त्रिदशवनिताः सोद्वेगैर्मनोभिः स्वं प्रतियियुर्धाम॥

। एकादशः सर्गः ।

अथ निसर्गादमर्षात्, तया चाप्सरोमुखाच्छ्रुतया जिष्णोर्जितेन्द्रियतया प्रतीतः पाकशासनस्तस्याश्रममाजगाम। तं मुनिरूपधारिणं च वयोऽतीतमिव चाध्वना द्राघीयसा परिक्रान्तमिव चेन्द्रमनु-

---

अभिसारणे—समागमविषये।

सोद्वेगैः—कार्यसिद्ध्यभावात् सनिर्वेदैः।

प्रतीतः—हृष्टः।

रूपः पुरस्ताद्ददर्श तस्य सूनुः। अपि च कीर्णया जटानां संहत्या परिवीतशिराः, आद्यून इव सद्गृहिण्या प्रायो यष्टयैवावलम्बितकृशाङ्गयष्टिः, वपुषा गूढोपि लोकाभिभाविना राजधाम्ना तनुनाभ्रपटलेन छन्नविग्रह इवांशुमान्, अप्राकृताकृतिः, बिभ्राणोऽपि जरतीं तनुं ससाध्वसमिवाश्रमं स चकार। पृथासूनुश्च स्नेहेन तमभितः परितस्तरे; अविज्ञातायामपि बन्धुतायां बलात् प्रह्लादते मनः। अथ हरिरपचितिमातिथेयीं सुतादासाद्य, विश्रम्य च विष्टरे व्याजहारैवम्।

"अङ्ग! त्वया साधु समारम्भि वृत्तम्; यन्नवे वयसि तपश्चर्यते; वर्षीयान् प्रायो मादृशोऽपि हि विषयैर्ह्रियते। तवाकृतिः श्रेष्ठां गुणसंपदं संप्राप्ता; लोके रम्यता सुलभा; दुर्लभं हि गुणार्जनम्। यौवनश्रियः शरदम्बुधरच्छाया इव गत्वर्यः; विषयाः खल्वापातरम्याः परितापिनश्चान्ते। चित्तवान् भवसि; यत् त्वां कल्याणी मतिरियमुपस्थिता; किंतु केवलं ते विरुद्धो वेषः सन्देहयति मे मनः। किमिदं त्वया युयुत्सुनेव कवचमामुक्तम्; तपस्विनो हि

तस्य सूनुः—अर्जुनः। आद्यूनः—औदरिकः। परितस्तरे—तद्गोचरेण दर्शनेन पर्यावृत इत्यर्थः। अपचितिं—पूजाम्।

वर्षीयान्—अतिवृद्धः। गत्वर्यः—चञ्चलाः। चित्तवान्—प्रशस्तमनस्कः। आमुक्तम्—अर्पितम्, धृतमिति यावत्।

केवलमजिनवल्कले वसते। निस्स्पृहस्य, भूतानामनभिद्रुहः, तपस्स्थस्य तव महेषुधी, भीमं धनुः, मृत्योरपरो भुज इवासिरप्येष न शमं समर्थयते। अरातिजयमत्रभवान् नूनमभिलषति। क्वायुधं क्रोधलक्ष्म, क्व च क्षमावन्तस्तपोधनाः। यो निश्श्रेयस्करी क्रियाः करोति वधोदर्काः, स ग्लानिदोषच्छिदः स्वच्छाः षड्भयत्यपो मूढः। हिंसादेर्दोषस्य मूलमर्थकामावपि मा स्म पुषः; तत्त्वावबोधस्य तौ हि दुर्वारावुपप्लवौ। भूतानामभिद्रोहेण श्रियो गत्वरीर्जयन् जनः सिन्धूनामुदन्वानिवापदां पात्रं भवति। अपि च, तपोधन! विजहीहि रणोत्साहम्; मा नाम नीनशः साधु तपः; शान्तः सन् जन्मनः समुच्छेदं कर्तुमेधि। हितेन युक्तः खलु हृष्यसि, तदपेतश्च परितप्यसे; यद्यात्मनः पीडा नेष्टा, सा तर्हि मा परस्मिन्नपि जने स्म सञ्जि भवता। लक्ष्मीमिव चलाचलां स्थितिमस्य जन्मिनो जानन् भवान् मा स्म वधीन्न्याय्यम्; साधवो हि न्यायाधाराः।

वसते—आच्छादयन्ति। न समर्थयते—न संभावयति। वधोदर्काः—हिंसाफलकाः। मा स्म पुषः—नोपचिनुष्व। उपप्लवौ—अन्तकौ। मा नाम नीनशः—न नाशय। जन्मनः समुच्छेदं कर्तुम्—मोक्षं साधयितुमित्यर्थः। मा सञ्जि—न सज्जयताम्; सञ्जतेर्ण्यन्तात् कर्मणि लुङ्। मा स्म वधीत्—मा नाश-

देहे दुर्जयाश्चक्षुरादयो रिपवो जीयन्ताम्; जितेषु तेषु, ननु कृत्स्नोऽयं लोकस्त्वया जितः। नगे विविक्तेऽस्मिन् जह्नुकन्यया भूयः प्लाविते त्वां पुरा प्रत्यासीदति मुक्तिः। अतस्त्वमुदायुधो मा भूः।"

इति मरुतां प्रत्यौ व्याहृत्यावस्थिते, सप्रश्रयगम्भीरमथ वच एवमुवाच कपिध्वजः। "भगवन्! प्रसादरम्यम्, अर्थैर्गरीयः, निराकुलम्, ऋषेश्चित्तमिव शान्तम्, प्रियमिदमीदृग्गुणोपेतं कोऽन्यो व्याकुर्यात्। अमुष्य मदीयस्य यत्नस्य न ते पौर्वापर्यं ज्ञातम्, येन मां मुनिभिस्तुल्यं धर्मं शासितुमिच्छसि। अविज्ञातप्रबन्धस्य वाचस्पतेरपि वचो नयद्रुह इवेहितं व्रजत्यफलतामेव। श्रेयस्करस्यापि तेऽस्य वचसः, स्फुटतारस्य नभसो दिवस इव नाहमस्मि भाजनम्। जात्या क्षत्रियोऽहम्, पाण्डोस्तनयः, पृथासुतः, नाम्ना धनञ्जयः; दायादैः प्रास्तस्य ज्येष्ठभ्रातुः शासने स्थितः, कृष्णद्वैपायनस्यादेशात् स्वाराध्यस्य मरुत्वतो भृशमाराधने समुद्युक्तो व्रतमीदृशं

येत्यर्थः। देहे—देहे वर्तमाना इत्यर्थः। पुरा—निकटे, प्रत्यासीदति—संनिकृष्टा भविष्यतीत्यर्थः। उदायुधः—गृहीतायुधः। ईदृग्गुणोपेतं—यथोक्तगुणयुक्तम्। व्याकुर्यात्—व्याहरेत्। नयद्रुहः—नीतिविरुद्धकारिणः। दायादैः—ज्ञातिभिः। प्रास्तस्य—राज्यान्निरस्तस्य। स्वाराध्यस्य—सुखमाराध्यस्य।

बिभर्मि। राज्ञा दुरक्षान् दीव्यता राज्यमात्मा वयं वधूश्च पणतां नीताः; अहो! भवितव्यता नूनमीदृशी। तेन हेतुना द्रौपद्या चानुजैश्च विना मया यामिनीष्वपि भृशं तप्यते। सभायां प्रसभं हृतोत्तरीयां द्रौपदीम्, प्राप्तह्रियश्चास्मान् हन्तारातयो मर्मच्छिदा वचसा निरतक्षन्। सत्याः कृष्णाया गुरुसन्निधावानयने भावमन्तकः सपत्नेषु सत्यङ्कारमिवोपाधत्त। गुणप्रियोऽस्मज्ज्यायानेव तां निकृष्टामस्मदृशां सोढवान्; द्विषां कालेनापि सुलभो हि भङ्गः; सत्स्ववाच्यता तु दुर्लभा। धार्तराष्ट्रैः सह पूर्वा प्रीतिरेवासूयत वैरमस्मासु; असन्मैत्री हि कूलच्छायेव सेविता भवत्यनर्थाय। अपवादादभीतस्य, गुणदोषयोः समस्यासद्वृत्तेर्वृत्तमहो विधेरिव दुर्विभावम्। न वयमसमर्थास्तदीयस्य दौर्जन्यस्य प्रतिविधाने; नैवेतः समुचितश्च जोषंभावः; शक्तिवैकल्येन नम्रस्य, निस्सारत्वात् लघीयसश्च प्राणिनो मानहीनस्य तृणस्य च गतिः समा भवति। दुरासदैर्वैनैः प्रवृद्धस्तुङ्गोऽपि गम्यो भवति भूधरः; महौजस्को मानप्रांशुश्च पुमांस्तु भवत्यलङ्घ्यः।

"भगवन्! न प्रार्थयेऽहं सुखम्; नाप्यर्थमुदन्वद्वीचि-

दुरक्षान्—कपटपाशकैरित्यर्थः। दीव्यता—क्रीडता। निरतक्षन्—अशातयन्। सत्यङ्कारमिव—सत्यापनमिव; चिकीर्षितस्य कार्यस्यावश्यं क्रियास्थापनार्थं परहस्ते यद्दीयते स सत्यङ्कारः। उपाधत्त—निहितवान्। असूयत—उत्पादितवती।

चञ्चलम्; न चानित्यताशनेस्त्रस्यन् ब्रह्मणः पदं विविक्तम्; किन्नु छद्मना नः कृतमयशःपङ्कं लोचनाम्बुभिररातिवनितानां प्रमार्ष्टुमिच्छामि। सद्भिरहमपहस्ये वा; अस्तु वा मे धियः प्रमादः; काममस्थानविहितायासो जिह्रेतु वा भवान्; विद्विषां समुच्छेदेन वंशलक्ष्मीमनुद्धृत्य, मोक्षमपि जयश्रियोऽहमन्तरायं मन्ये; अरिभिर्विलुप्तं न यावदिषुभिरादत्ते पुनर्यशः, तावदजातप्रायः स पुरुषः, गतासुर्वा, भवति तृणमेव वा। तपोधन! त्वमेव ब्रूहि, द्विषतामनिर्जयेन यस्य प्रशाम्यत्यमर्षः, कथमेष पुरुषशब्दार्हः। युधि यथाप्रतिज्ञं द्विषतां प्रतिचिकीर्षया, तृष्यन् जलाञ्जलिमिव, मामेव नृपतिः स्मरति। कृच्छ्रेषु भर्तुराज्ञया यस्मिन् व्यर्थया भूयते, वंशस्यावदातस्य स शशाङ्कस्य लाञ्छनमिव भवति। धूरियं मय्यारूढा; जननी च मे दूरगा; नृपश्च ज्यायानाचारवान्; नाहमतः स्वतन्त्रः। ततोऽहं स्वधर्ममनुरुन्धन् नगमूर्धन्यस्मिन् विच्छिन्नाभ्रविलायं विलीये वा, सहस्राक्षमाराध्यायशश्शल्यमुद्धरे वा।"

इत्युक्तवन्तं तनूजमाविष्कृतनिजदिव्यमूर्तिर्मघवा दोर्भ्यां परिरभ्य, श्रेयःप्राप्तये भवस्याराधनमघोपघातक्षमं तस्मा उपदिदेश।

तृणमेव वा—तृणतुल्यं वेत्यर्थः। **कृच्छ्रेषु**—सङ्कटेषु समुपनतेषु। **विच्छिन्नं** वाताहतं अभ्रमिव विलीयेति **विच्छिन्नाभ्रविलायं** यथा तथा। **विलीये**—विशीर्ये वा। **उद्धरे**—उद्धरिष्यामि वा।

'प्रीते पिनाकिनि, मया सह लोकपालैर्विहितम्, लोकत्रयेऽप्यप्रतिवार्यं वीर्यं प्राप्य, परेषां लक्ष्मीं त्वयि भृशं समुत्सुकयितासि' इति वाचमुच्चार्य स तिरोबभूव॥

। द्वादशः सर्गः ।

अथ धनञ्जयः प्रसन्नवदनः सन्, वासवस्य वचनेन त्रिलोचनमाराधयितुं विधिवत् क्लान्तिरहितस्तपांसि विदधे। विमलस्यानाशुषस्तस्याभिरश्मिमालि चरणेनैकेन भुवि तिष्ठतो बहुतिथास्तिथयः प्रतिजग्मुः। वपुषश्चेन्द्रियाणां चोपतपनेषु सततमसुखेष्वपि नगपतिरिव स्थिरतां पाण्डवः प्राप; महतां धैर्यं ह्यविभाव्यवैभवम्। स तपसा कृशम्, विजितजगत्त्रयोदयम्, तत्त्वविदामपि त्रासजनकं

परेषां लक्ष्मीं त्वयि भृशं समुत्सुकयितासि—शत्रूणां श्रियं त्वयि सुतरामनुरक्तां कर्तासि; पुनस्तामाहरिष्यसीत्यर्थः।

अनाशुषः—अनश्नतः। **अभिरश्मिमालि**—सूर्याभिमुखम्। बहूनां पूरणाः **बहुतिथाः**, बहुसंख्याका इत्यर्थः। **तिथयः**—दिनानि; अत्र तिथिशब्दः पुंलिङ्गः। **असुखेष्वपि**—अनशनादिदुःखेष्वपि। **विजितः जगत्त्रयस्योदयः** उत्कर्षो येन

वपुरुवाह; मनस्विनां किमिव तत्, यदस्ति न सुकरम्; अधिज्यशरासनम्, उद्गतारुणजटांशुं तम्, पुरीरासुरीर्मिमन्थिषुं रुद्रमिवानुदितललाटदृशं ददृशुर्जनाः। दूरगं हरितनयस्य तद्धाम न भूरुहवनानि ददाह, न वा नयति स्मापः परिशोषम्; परंतु न तत् सिद्धतापसैः सुसहं बभूव।

अथ गुणा विनयमिव, नया विवेकमिव च महर्षयः शिवमशरणाः शरणं ययुः। उदस्तदिनकरमयूखमण्डलैरंशुभिः परिवीतं शम्भुमुपहतदृशस्ते न सहसा प्रसेहिरे निचायितुम्। भूतभव्यभवदीशं मुनयस्तमभिमुखयितुमस्तुवन्। अथ महसस्तस्य मध्ये कमनीयविग्रहम्, परिणाहशालिनि वृषस्य ककुदे कृतबाहुम्, अनुजानुमध्यं महाहिना लम्बिततवपुषम्, उपवीतसूत्रतां नीतमुरगमनुरञ्जयता शितिना गलेन विलसन्तम्, अवशिष्टमिव सुरसरित्पयः शशिनो धाम शिरसा बिभ्रतम्, तुहिनशैलशिरस्युन्नते स्थितं ते ददृशुरयुग्मलोचनं पुरुषम्।

तत् तथोक्तम्। उद्गता अरुणा जटांशवो यस्य तम्। आसुरीः पुरीः—त्रिपुरम्। मथितुमिच्छुं मिमन्थिषुम्।

निचायितुं—निशामयितुम्, द्रष्टुमित्यर्थः। जानुनोर्मध्ये अनुजानुमध्यम्। शितिना—नीलेन।

ततो मुनयश्शिवस्याभिमुखमेत्य, तेन नेत्रसंज्ञया प्रेरिताः, पाण्डुतनयस्य तपसा जगतां जनितं भृशमशर्माचचक्षिरे।" भुवनैकपुरुष! भूतेश! वृत्त इव भीमविग्रहः पुरुषः कोऽपि रवेरपि ज्योतिरभिभूयेन्द्रकीले तपस्यति। स महान्ताविषुधी, धनुः, कवचम्, असिम्, जटाः, वल्कलम्, अजिनं च बिभर्ति। इत्येवंरूपमिदं चित्रं यद्यपि मुनिताविरोधि वेषधारणम्, अथापि न चेदमस्य न राजते। अवनिरपि तस्मिन् चलिते चलति; सति तस्य करणनियमे, शान्तवेगैर्मरुद्भिर्हृतारकागणैर्युतं नभस्तलं स्तम्भमनुभवति। न वयं विद्मः स जगन्ति युगपद्विजिगीषते वा, अथवैकपदे संजिहीर्षति वा, अथवा प्राप्तुमपवर्गमभिवाञ्छति; न वयमस्य तेजांसि विषहितुं क्षमाः। लोकनाथ! न किञ्चन न विदितं ते; कथय, किमुपेक्षसे; अभयद! त्रातुमर्हस्यलं नः।"

इत्यभिधाय मुनिषु विरतेषु, अन्धकान्तको जलदनादगम्भीरं दिशां विवरं ध्वनयन् वचनमेवमादत्ते। "तपोधनाः! बदरीतपोवननिवासनिरतम्, गां गतमादिपुरुषस्यांशं नरं तं जानीत। मावैनमन्यथावगात। एष भुवनाभितापिनो द्विषतः परासिषुर्महत् तपो

अशर्म—असुखम्, दुःखमित्यर्थः। संजिहीर्षति—संहर्तुमिच्छति वा। नरं—नरसंज्ञकं नारायणसखम्। मावगात—मनुष्यमात्रं मा जानीतेत्यर्थः। परासिषुः—परासितुमिच्छुः।

मदुपासनात्मकं विहितवान्। सरसिरुहजन्मनः प्रार्थनया विभुर्नरो-ऽयमच्युतश्चासुरनिधनेन प्रजाः पातुमभ्युपेत्य भुवं तिष्ठतः। मूकाख्यो दानवः कश्चित् पाण्डवस्यास्य कर्म सुरकृत्यमिति विचिन्त्य पाण्डुसुतं हन्तुमद्याभिपतति। तत् गम्यतां त्वरया युष्माभिस्तत्र मया सह। पापनिरतोऽयमसुरो रन्ध्रेऽप्यगूढमेनमभिभवितुमपारयन्, मायावराहरूपेण व्यवस्यति विजयमभिभवितुम्। वपुषा विडम्बितकिरातनृपतिना मया निहतेऽस्मिन् वराहरूपे रिपौ, प्रसभमेष पाण्डवो मृगयाविवादमाचरिष्यति। तदानीं तपसा नितरां कृशस्य, मृधे सहायरहितस्य भुजयोरस्य बलमतुलं पश्यत।"

इति शिवस्तानुदारमभिधाय विषमविन्यस्तहरिचन्दनेन लसद्वजमौक्तिकावलियुतेन वक्षसा च, पुष्पितलतान्तनियमितकेशेन शिखिपिञ्छलाञ्छितकपोलभित्तिना वदनेन चारुणितनयनेनोपलक्षितः, बृहदुपहितैकमार्गणं जलदनादि धनुरुद्वहन्, रूपेण सपदि रुचिरकिरातपृतनापतिर्बभूव। प्रमथगणाधिपैरथ शिवस्यानुकूलमिति

विभुः प्रभुः। रन्ध्रेऽपि—एकान्तेऽपीत्यर्थः। अगूढं—स्पष्टं यथा तथा। विजयं—अर्जुनम्। मृगयाविवादं—मत्प्रहतस्य मृगस्य स्वयमेव प्रहर्तेति कलहमित्यर्थः। मृधे—युद्धे।

विषमविन्यस्तहरिचन्दनेन—विकृतविन्यस्तरक्तचन्दनेन। उपहितैकमार्गणं—आरोपितैकबाणम्, बृहद्धनुः।

विचिन्त्य, शूलपरशुशरचापानि वहद्भिरात्तकिरातविग्रहैर्महती वनेचरचमूर्विनिर्ममे। अथानुगिरमीश्वराज्ञया ते काननविभागमस्यायमिति विरचय्य सघोषं परितो मृगयामपदिश्य प्रतस्थिरे। तदा क्षुभितानामभितो निस्सृतानां शकुनिमृगयूथानां निस्स्वनैः सहसा स भूधरो भयाद्ररासेव।

इत्युमापतिरचलसानुषु वनगहनेषु च जातान् सत्त्वान् क्षोभयन् मुदितहरिणीभिर्जग्धवीरुधं वसतिमैन्द्रसूनवीं प्राप। अथ भूतेशः पोत्रनिकषणेन विभिन्नभुवम्, मुनेरभिमुखमुपस्थितम्, घननीलम्, सौकरं वपुर्दधानं दनुजमपश्यत्। स सुरसरितः कच्छान्ते शिवः सेनां निधाय, कतिपयैः किरातवर्यैरन्वीतः, तरुगहनगुल्मजालैः प्रच्छन्नः सूकरस्य तस्यानुपदं संप्रतस्थे॥

। त्रयोदशः सर्गः।

महेन्द्रसूनुरथ महता वपुषा भूधराणां विभेदेन संभाव्यपराक्रमम्,

अनुगिरं—गिरौ। ररासेव—चुक्रोशेव।

कच्छान्ते—अनूपप्रान्ते। अन्वीतः—अनुगतः।

स्थिरदंष्ट्राभ्यामुग्रमुखं वराहं तं विलोकयाञ्चकार । स्फुटबद्धसटोन्नतिः स वराहो दूरादभिधावन् मनसि तस्य वितर्कमिममाददे । 'कठिनेन पोत्रेण वृक्षमूलानि विदारयन्, घनस्कन्धनिकाषेण वप्रान् भिन्दन्, मामयं सूकरः समरायाजुहूषमाण इवाभिवर्तते । तपोनुभावादिह व्यालमृगा वीतवैराः प्राण्यन्तरेषु जहति वृत्तिम्; अयं तु वराहस्तां वृत्तिं मयि विधत्ते; किंनु विकृतिरियं भवेत्, किं वा भवेन्माया । किमारादवधूय विरोधिनीर्मृगजातीरेष जवेन मामभियाति । नायं खलु मन्ये मृगः; किन्तु कोऽप्यन्य एव जिघांसुः । अत्र हि तथाविधं मे मनः क्षुभ्यति; विमलं कलुषीभवच्च चेतः स्वयमेव हि हितैषिणं रिपुं वा कथयति । किंस्विदयं दनुजः, अथवा क्षपाचरः; वनजे सत्त्वे बत बलमीदृशं नावलोकितम्; तथा हि; मेघनीलोऽयं शैलराजं सकलमभिभूय कम्पयतीव । अयमेव शमस्थं मां प्रहरिष्यन् मृगव्यसत्रकामो ध्वजिनीरवैः पृथुभिः काननानि चकितोद्भ्रान्तमृगपक्षीण्यकार्षीत् । अथवा सुयोधनस्य

स्फुटबद्धसटोन्नतिः—क्रोधाद्धर्षितलोमेत्यर्थः । आददे—उत्पादितवान् । आजुहूषमाणः—आह्वातुमिच्छन्निव । व्यालमृगाः—क्रूरा व्याघ्रादयः । प्राण्यन्तरेषु वृत्तिं जहति—हिंसया न जीवन्तीत्यर्थः । तां वृत्तिं मयि विधत्ते—मां हन्तुमिच्छतीत्यर्थः; मृगव्यं—मृगया, तस्य सत्त्रं—वनम्, तदर्थं वनमित्यर्थः, तत्

प्रियं विधातुं कोऽपि तिर्यग्रूपमाश्रित्य मामभियोक्तुमेवमागतः । खाण्डवजातवेदसा प्रसभमवलीढबन्धुरश्वसेनः समन्युः प्रतिकर्तुमथवैवमुपागतः । भवतु यथा तथा वा, वियमुच्छेदपरां दधानोऽयं नियमेन निर्वर्हणीयो मया; अरातिभङ्गं हि परमं लाभमाहुः । रन्ध्रान्वेषिणाममार्गदायिना तप्तव्यं मया तप इति मुनिरपि मामन्वशात्; बलिनश्चास्य मृगस्य वधादृते न शक्यं व्रतसंरक्षणम् ।' इति विचिन्त्य धनञ्जयः पौरुषचिह्नं प्रथममग्रहीच्चापम् ।

अथ शम्भुश्च, त्रिपुरवधोद्यतमात्मानमिव परेषां भयानकमर्जुनं दृष्ट्वा, स्वचरणास्कन्देन नामिताचलेन्द्रः संहितेषुः आय-

---

कामयत इति मृगव्यसत्रकामः; मृगयाभूमिपरिग्रहार्थी सन्नित्यर्थः । मायाकिरातसेनया समुत्पादितं मृगयाकोलाहलं कपटवराहजमिति भ्रान्त्या वितर्कयति पार्थ इति 'अयमेव शमस्थं मां' इत्यादिना निरूपयति । खाण्डवजातवेदसा—खाण्डववनाग्निना । अवलीढबन्धुः—दग्धबन्धुः । अश्वसेनः—तक्षकपुत्रः कश्चिन्महासर्पः । पुरा किल पाण्डव. खाण्डवदाहे पावकभयात् पलायमानांस्तक्षक-पुत्रानश्वसेनस्य बन्धून् बाणैरवरुध्य दाहयामासेति भारतकथा ।

अन्वशात्—अनुशिष्टवान्; अनुशासेर्लङ् ।

स्वचरणास्कन्देन—आत्मनः पदविष्टम्भेन । आयतभोगः—दीर्घीकृतकायः वासुकिरेव ज्या, तस्य वदनमेव ग्रन्थिः, तेन

तभोगवासुकिन्यावदनग्रन्थिविमुक्तवह्नि धनुराचकर्ष । भवस्यार्जुनस्य च तदा सहार्थं विधास्यतोर्मध्यमनुबन्ध इव प्राप स रिपुः पराभवाय । अथ महतः पिनाकात्, अभ्राद्वैद्युतः कृशानुरिव, दीपितवारिवाहवर्त्मा जवादिषुर्निपपात । तं पिनाकादपयन्तम्, वराहमाविशन्तं च पृषत्कं शिवान्तिकस्था वराहोपोढाश्च नभश्चरा युगपद्ददृशुः । सपदि कपिध्वजस्येषुश्च परमास्त्रपरिग्रहेण महत्तेजः समुद्वमन्, वेगाधिक्यादविभावितनिष्क्रमप्रयाणश्चकार लक्ष्यभेदम् । स विजयिनः शरः प्रतिपक्षं वृषध्वजसायकभिन्नम्, विधिनोदीरितमर्थं प्रयत्न इव लघु साधयितुं शशाक ।

अथ दीर्घतमं तमः प्रवेक्ष्यन् वराहो भग्नवेगो भ्रमन्, खुरदंष्ट्राग्राणां निपातेन दारिताश्मा, उष्णेन निजशोणितेनार्द्रां क्षितिं गतः, क्षणमिन्द्रसूनुं निरीक्षन्, सामर्षं विधाय गुरुध्वनिमसुभिर्नि-

---

विमुक्तो वह्निः यस्य तत्। **सहार्थ**—संभूयारिवधरूपं प्रयोजनम्; अन्यत्र सहार्थ–अभिधेयम्; 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः' इति वचनात् । **प्रकृतिः**—धात्वादिः । **प्रत्ययः**—सनादिः । **अनुबन्धः**—इत्संज्ञको वर्णः । **पराभवाय**—क्षयाय, अन्यत्र लोपाय । **वारिवाहवर्त्मा**–आकाशम् । **अपयन्तं**–निर्गच्छन्तम्। **वराहोपोढाः**—वराहस्य प्रत्यासन्नाः ।

रासे । पार्थः प्राज्यशरोऽपि स्फुटपौरुषं तं शरमथ वराहभेदिनं जिघृक्षुरापपात । तत्र सामोदं समुद्धरन् शरं तं स महाभुजः स्मरारेः शासनं प्रकाशयितुमग्रतः स्थितम्, कार्मुकभृतं कमपि सहसा पश्यति स्म वनेचरम् । स चात्मजातिसदृशीं किलानतिमर्जुनाय प्रयुज्य, सान्त्वपूर्वकं सनीति च वक्तुमित्यमुपचक्रमे ।

"तात! आकृतिस्ते दिव्येयमवदातमन्ववायम्, शान्तता च सविनयां मनोवृत्तिं नु प्राह । निर्जिततमसस्ते नैव मुक्तिरपि दवीयसी । उपपन्नपौरुषः स त्वं वराहभेदिनमस्मदधिपस्य सायकमेनमित्यं नार्हसि हर्तुम् । सनातनात् न्याय्यादाचरणात् यदि भवादृशो ध्वंसते, ततः कस्तेन वद वर्त्मना प्रयातु । नूनं तव शरानुकृतिमयमनुयातीत्यपथे त्वया पदं कृतम् । न केवलमन्यदीयस्य विशिखस्याहरणे निस्स्पृहेण भवितव्यम्, किंतु परनिबर्हितं मृगं निघ्नता व्रीडितव्यमपि सचेतसा त्वया । यद्यस्मद्वाहिनीपतिः शि-

---

निरासे--निरस्तः; त्यक्त इत्यर्थः; अस्यतेः कर्मणि लिट् । **प्राज्यशरः**--प्रभूतशरः सन्नपि । **स्फुटपौरुषं**–दुर्धर्षवराहभेदित्वात् व्यक्तविक्रमम् । **आपपातु**—आधावति स्म ।

उपपन्नपौरुषः–संभावितपराक्रमः । **ध्वंसते**–भ्रश्यते । **परनिबर्हितं**--परेण प्रहतम् । **सचेतसा**—मनस्विना । यदि

तेन शरेण नैनमाशु मृगं प्रत्यपत्स्यत, तर्हि त्वय्योजसा यदसाव-करिष्यत् तदुर्वचम् । वज्रायुधस्थेयसीमङ्गसंहतिं दधतमिमं दुर्वार-वेगं दंष्ट्रिणमृते नश्चमूपतेः शरेणान्यः को नु हन्तुमर्हति । समुप-नते ते जीवितसंशये त्वामापदः समुद्धरन्, अस्मद्वाहिनीपतिरुप-कारी मित्रमपि ते जातः ; तं विरोध्य सज्जनैकवसतिर्मा भवता निरासि कृतज्ञता । ज्ञायते, जयार्थमेव भवता तपस्यते ; मुमुक्षवो हि नायुधानि दधते । अस्मन्महीभृता सह संगतेन त्वया सकलं च तपःफलं प्राप्स्यते । वाजिभूमिः, इभानां काननम्, रत्ननिधयश्च भूरिशः सन्त्यस्मत्स्वामिनः; अमुना किमिव सौवर्णेनास्य पत्रिणा; परं तु केवलं न विलङ्घनं स सहते। तत्, तदीयस्य विशिखस्याति-सर्जनात् राघव-प्लवगराजयोरिव यादृच्छिकमितरेतराश्रयमस्तु वां गुरु प्रेम । अथ चेन्मार्गणैस्तवास्ति प्रयोजनम्, तर्हि नः किमु न भूभृतः पतिं नाथसे ; स त्वद्विधं सुहृदं प्राप्यार्थिनं किं न मेदि-

---

न प्रत्यपत्स्यत-नाभियुञ्जीत चेत् । **ओजसा**—बलेन । **असौ**--वराहः । **वज्रायुधस्थेयसीं**—वज्रकठिनाम् । **अस्म-द्वाहिनीपतिः**---अस्मत्किरातसेनाधिपः । **तपस्यते** तपश्चर्यते । **वाजिभूमिः**—अश्वानामाकरः । **विलङ्घनं**--व्यतिक्रमम् । **अतिसर्जनात्**—प्रत्यर्पणात् । **भूभृतः पतिं**—गिरेः प्रभुम्, अस्मदधिपमित्यर्थः; गिरीशमिति च गूढोक्तिः। **नाथसे**—या-

नीमपि विजित्य यच्छति ; अस्मत्क्षितिपतिना स्वीकृतोऽयं मृग-स्त्वया मुनिचापलाद्यदभ्यघानि तदयमक्षमिष्ट ; प्रमाद्यतां दोषम-ज्ञता संवृणोति खलु । जन्मवेषतपसां विरोधिनीममूमपक्रियां मा पुनः कृथाः ; अपथे हि वर्तमानं दुर्मतिमुभयलोकदूषण्यापदेति । अयमस्त्रवेदवित् ; अतः कश्चन पर्वतीयो महीपतिरिति मावजी-गणः । मरुत्त्वता मुवमिमां गोपितुमयमनुनीय शैलवासं लम्भितः । सुबह्वीभिर्वीचिभिः सिन्धुरिव, पृतनाभिस्तिग्महेतिभिरन्वितः समयसेतुवारितोऽस्मद्भूपतिरेष दृश्यतां तिष्ठत्यनोकहान्तरे । मति-मन् ! सख्यं धनुर्वहतोऽस्य मतिमनुकूल्य ; अनेन प्राप्य सख्यं चिन्तितानि सुखमभियास्यसि" ॥

चसे । **अभ्यघानि**—अभिहतः ; हन्तेः कर्मणि लुङ् । पर्वते भवः **पर्वतीयः**, महीपतिरिति मावजीगणः--वनेचरबुध्या मावज्ञा-सीरित्यर्थः; गणयतेर्माङि लुङ् । **समयः**—मर्यादा, **सेतुरिव** समयसेतुः, तेन वारितः सन् । **अनोकहान्तरे**—द्रुमान्तर्धाने । **अनुकूलय**—अनुकूलां कुरु, सख्यं कुर्वित्यर्थः । **चिन्ति-तानि**—मनोरथान् ।

। चतुर्दशः सर्गः ।

किरातस्य तैरुद्धतैर्वचोभिः पराहतः पाण्डवः कुपितोऽपि न धैर्यं जहौ ; साधवो हि सुदुर्ग्रहान्तःकरणाः । कृती स सम्यगवगतशास्त्रवेङ्गितः कालोचितं विवक्षुः प्रशान्तसंरम्भ इव मन्दं मन्दं वक्तुमेवमुपचक्रमे ।

"अङ्ग! प्रसन्नगम्भीरपदा, द्विषामपि हृदयानि प्रसादयन्ती, सुखश्रुतिरकृतपुण्यकर्मणां न प्रवर्तते सरस्वती । विपश्चितां सम्यतमास्ते भवन्ति, ये मनोगतं वाचि निवेशयन्ति ; तेष्वपि गभीरमर्थं कतिचिदेव निपुणाः प्रकाशतां नयन्ति । किरातधुर्य ! भारतीमिमां गुणैः प्रगल्भां समस्य संपादयता त्वया वनेचरेणाप्यात्मा धुरि वाग्मिनामधिरोपितः । सामवचनं प्रयुज्य विलोभनमाचरितम् ; धियो विभेदाय भयं च प्रदर्शितम् । भवतु ; कुतो भवता मत्सिद्धेर्विरोधमेवं कर्तुमुद्यतः स ते भूपतिर्न वारितः । नृपस्त्वनुजीविना भूतिमिच्छता हिते नियोज्यः खलु । त्वत्स्वामिना प्रयुक्तस्य पत्रिणो ध्रुवं स्यात् क्वचिददर्शनम् ; तस्य शिलोच्चये विमार्गणं

पराहतः—अभिभूतः । **सुदुर्ग्रहान्तःकरणाः**—अप्रकम्प्यहृदयाः । **प्रशान्तसंरम्भ इव**—संक्षोभरहित इव ।

वाचि निवेशयन्ति—वाचा उद्गिरन्तीत्यर्थः । **समस्य**—संयोज्य । **पत्रिणः**—शरस्य । **विमार्गणं**—अन्वेषणम् ।

न्याय्यम् ; अन्यथा नात्र युक्तमार्यजनातिलङ्घनम् । पूर्वमग्निना खाण्डवमत्तुमिच्छता सङ्क्षचातीताः शिलीमुखा मे दत्ताः ; अमरसायकेष्वप्यादररहितस्य कथं मम शैलजनस्याशुगे भवत्यास्था । अथ वनाश्रया मृगाः कस्य परिग्रहाः । यस्तान् प्रसभमेवं शृणाति, तस्य ते भवन्ति । मृगान् स्वार्थं विनिघ्नन् मृगयुः कथं तपस्विनां स्यात् कृतोपकारः । अस्तु नाम, क्षतः क्षणादेव मृगः ; अनेन स पूर्वं क्षतः, न च मयेत्यत्र का गतिः । 'न कस्मैचिदपि तपोऽवसरे प्रदीयतां वर्त्म' इति महर्षिणा विहितं मे व्रतम् ; अतो मया जिघांसुर्मृगो निहतः ; व्रताभिरक्षा हि सतामलङ्क्रिया । निरायुधे कस्मिंश्चिन्मुनौ सत्त्वेन केनचिज्जिघांसिते, कृपेति तद्रक्षणविषये स्यादभिहितिरकृत्रिमा महताम् ; सज्यं शरासनं बिभ्रति मयि स कथं कृतानुकम्पः प्रतीयते । 'कामं स भवता याच्यताम्' इति यदात्थ, नैतदनल्पचेतसां क्षमम् । नृपस्तवाभूतमभियुज्य, विरुद्धमलभ्यं चेहितं लिप्सते ; अपाये समुपनते,

---

शैलजनस्याशुगे—किरातजनस्य बाणे । **परिग्रहाः**—आयत्ताः । **शृणाति**—हन्ति । **मृगयुः**—व्याधः । **क्षत इति**—आवाभ्यां युगपदेव विद्ध इत्यर्थः । **का गतिः**—किं प्रमाणम् । **महर्षिणा**—व्यासेन । **जिघांसिते**—हन्तुमिष्टे । **अकृत्रिमा**—अकपटा । **अनल्पचेतसां**—गभीरहृदयानाम् । **अभूतं**—अनृतम् । **लि-**

दुर्नयस्य रौद्रतां विजानतोऽपि मतिः परिमोहिनी भवति । शराः, धनुः, असिः, वर्म च मे किं त्वदीश्वरेण न विविच्य प्रार्थितम् । अथ चेदस्ति शक्तिः कृतमेव याच्ञया ; न शक्तिमतां दूषितः स्वयंग्रहः । स कथं युक्तः सखा त्वया कथितः, यस्तपस्यते यदृच्छयासूयति । किञ्च, क्व वर्णाश्रमरक्षणोचिता वयम्, क्व च मृगजीवितच्छिदो जातिहीना जनाः; न महतामपकृष्टैः सह सङ्गमो घटते ; न हि दन्तिनः सखायो भवन्ति गोमायूनाम् । सज्जनो यदा पृथग्जनेन विगृह्णाति तस्य तदा हतं यशः; अथ यदि मैत्रीं करोति दूषितास्तदा गुणाः ; परीक्षकः स्थितिमुभयथा समीक्ष्य, पृथग्जनमवज्ञोपहतं करोति । अनेन हेतुना व्याधस्य ते विरुद्धमाक्षेपवचो मया तितिक्षितम्; अथ यदि शरार्थमेष्यसि हठात् दृष्टिविषादहेः शिरोमणिं जिघृक्षतो गतिं लप्स्यसे ।"

इत्यर्जुनमीरिताकूतं दूतस्तेजसा प्रतितर्क्य, प्रसन्नरूपस्य ध्वजि-

---

प्सते—लब्धुमिच्छति । **अपाये** इत्यनेन वाक्येन 'विनाशकाले विपरीतबुद्धिः' इति नीतिं सूचयति । कृतमिति निषेधार्थमव्ययम् । **तपस्यते**—तपश्चरते, अनपराधिन इत्यर्थः । **गोमायूनां**—शृगालानाम् । **विगृह्णाति**—विरुणद्धि । अवज्ञोपहत—अनादरेण तिरस्कृतम् । **आक्षेपवचः**—तिरस्कारवचनम् ।

ईरिताकूतं—उक्ताभिप्रायम् । **तेजसा**—प्रतापेन ।

नीमुपेयुषो विरूपाक्षस्य समीपं ययौ । ततः पताकिनीपतेरादेशात्, महाचमूरम्भोधिवीचिसंहतिरिव निर्ह्रादवती चचाल । अहंपूर्विकया जवाद्यियासुभिः, सुगेषु दुर्गेषु च तुल्यविक्रमैः प्रमथगणैर्वनमविच्छेदनिरुद्धं निरुच्छ्वासमिव बभूवाकुलाकुलम् । ततस्तपस्यया प्रतनुमपि मदक्षतिक्षाममेकवारणमिव स्थितम्, विद्विषां निधनाय जातवेदसमिव परिज्वलन्तम्, अनादरेणोपात्तवृतैकसायकम्, शनैस्तद्भलौघे नयने निवेशयन्तम्, आपत्प्रतीकारकारणे शरासने निषण्णम्, नातिदूरे पतितस्य दंष्ट्रिणो वधादुपेयुषीमन्तकद्युतिं बिभ्रतम्, महर्षभस्कन्धम्, स्थूलकन्धरम्, हरिन्मणिश्यामम्, अंशुमालिनमिव जलादर्शे मनुष्यभावे स्थितम्, पुरातनं पुरुषम्, जगत्प्रमाथिनः प्रतापस्य गतिं पाण्डवं प्रमथगणास्तोयघना घना महाचलमिवासेदुः।

यथास्वमाशंसितविक्रमा रिपवस्ते प्रथमं मुनेः प्रभावात् क्षत-

निर्ह्रादवती—घोषवती । यातुमिच्छुभिः **यियासुभिः** । **सुगेषु**—सुगमेषु । **अविच्छेदेन**—नैरन्तर्येण, निरुद्धं—आक्रान्तम् । **तपस्यया**—तपश्चर्यया । **प्रतनुं**—कृशम् । **उपेयुषीं**—प्राप्ताम् । जलमेवादर्शः जलादर्शः, तस्मिन्, प्रतिबिम्बरूपेण स्थितमंशुमालिनमिव-सूर्यमिव । प्रतापस्य गतिं—पराक्रमस्य स्थानम् ।

यथास्वं ते रिपव आशंसितविक्रमाः—अहमेवैनं जेष्यामी-

तेजसः क्षणाद्ययुरप्रतिपत्तिमूढताम्; महाननुभावो हि पौरुषं प्रतिहन्ति; ततस्तेनोपपन्नान्योन्यबलेन प्रमथगणेन प्रयुक्ता मार्गणावलिर्भूरुहो विधूनयन्ती, तिरोहितदिगन्तरा, महावृष्टिरिवानिलेरिता रवं वितेने। ऋतूनां त्रयीमनिलाशिनः सतोऽपि तस्य रणाय प्रहृष्यतो जिष्णोर्वपुषि सति पोषं प्रयाति, प्रथमं शिथिलेन वर्मणा सत्वरं विदुषेव घनत्वमीये। मुनिरसाविषुभिः समूहन्निव दिशः, विक्षिपन्निव रवेः प्रभाम्, व्याकुलयन्निवानिलम्, चालयन्निव सशैलां क्षितिम्, क्षयकालदारुणो रुद्र इव चचाल। वनेचरैर्युगपद्विमुक्तान्यनेकान्यायुधानि स शरैः, अतिपातितः कालः क्रियाफलमिवान्तरा जघान। मर्मविदारणा अपि तस्य पत्रिणो गणाधिपानामविधायैव परासुतां निर्गताः कृतापराधा इवाधोमुखा निपत्य हिमवति जवात् क्वचिदतीयुः। 'किंस्विदेष तपोबलेन भूयसीरदृश्या-

---

ति काङ्क्षिताः कथिता वा विक्रमा यैस्ते। **क्षततेजसः**—हतप्रभावाः। **अप्रतिपत्तिमूढतां**—अज्ञानमोहान्धताम्। **अनुभावः**—प्रतापः—**उपपन्नान्योन्यबलेन**—प्राप्तपरस्परबलसाहाय्येन। **ऋतूनां त्रयीं**—षण्मासान्। **पोषं प्रयाति**—उत्साहोत्कर्षेण पुष्टिमधिगच्छति सति। **विदुषेव**—अनन्तरकरणीय जानतेव, **वर्मणा**—कवचेन, **घनत्वमीये**—निबिडत्वं प्राप्तम्। **समूहन्निव**—एकत्र समाहरन्निव। **अतिपातितः**—अतिक्रान्तः; **परासुतां**—मरणम्। **अतीयुः**—

स्तनूर्विधाय निरस्यत्येवमिषून्; आहोस्विदस्य मुनेर्भयेन गुणैर्वा हृता देवतास्तिरोहिताः प्रहरन्ति नः शरैः; अन्यथा कथममी युगपत् सायका अनेकेऽस्य सन्ततमूर्मय इव जलधेः समापतन्ति' इति वितर्काकुलितं किरातबलं नृपसूनुमार्गणैर्बलीयसा विधिना पौरुषमिव निरस्तं न रराज। प्रवितैः शरजालैर्विश्वान्तरालमाच्छादयन् धनुराकृष्य पाण्डुसूनौ विधुन्वति, जयलक्ष्मीर्विषमनयनस्य सेनायां भीतभीतेव पक्षपातं कथमपि विहातुं विषेहे॥

। पञ्चदशः सर्गः ।

अथ तत्र युधि वृत्रघ्नसुतस्य शरेभ्यस्तत्रसुर्भूतानि; सा च चमूः परित्यक्तायुधा दिशि दिशि पलायिताभूत्। ईशानमपश्यद्भिरिव रणान्निववृते च गणैः; मुह्यत्येव हि कृच्छ्रेषु प्रकृत्यैव संभ्रान्तं मनः। सत्रासं पलायमानान् खण्डिताशंसान् तान्, केतौ

प्रविष्टा इत्यर्थः। **विश्वान्तरालं**—अशेषं नभोमण्डलम्। **विधुन्वति**—आस्फालयति सति। **विषेहे**—शशाक।

भूतानि—प्राणिनः। **निववृते**—निवृत्तम्; भावे क्त। **कृच्छ्रेषु**—आपत्सु। **खण्डिताशंसान्**—ध्वस्तजयाशान्।

वानरमुच्चैः कृत्वा कृपालुरर्जुनो मन्दमेवान्वियाय; महौजसो हि भग्नान् नेच्छन्त्यतिपीडयितुम्। अथाग्रे साचिस्थितो हसन् सेनानीः स्थिरकीर्तिः किञ्चिदायस्तचेतास्तानेवं जगाद।

"भो सैनिकाः! समरं मा विहासिष्ट; युष्माभिः क्षुण्णासुरगणैः किमप्रमथगणैरिव क्षतमद्य यशः। विवस्वदंशुसंश्लेषेण द्विगुणितेजसो मोघमुद्वर्णा अमी वो हसन्तीव महासयः। पातितमाहात्म्यैः संहृतकीर्तिभिर्युष्माभिः कां गुर्वीमापदं हन्तुमेवं युद्धनिवृत्तिसाहसं कृतम्। मुनिरेष घृणया मन्दमिषुलतामस्यन्, जघनेषु सावज्ञं वः पशूनिव प्रणुदति। पुंसः कृतध्वस्तगुणात् वरं पुमानत्यन्तमगुणः; प्रकृत्या हि श्रेयानमणिरलङ्कारः, न तु च्युतोपलः। अयमीशः क्लैब्यमापन्नान्, अरातिना दृष्टपृष्ठान् वो दारानिव च्युताचारान् गोपितुमिच्छति। लोकानां वित्रासविधायिनि, आसुरे महाहवे युष्माभिः पौरुषमुन्नतिं नीतम्, तदिह धिङ्निरस्तम्।"

साचिस्थितः—तेषां निवारणाय तिर्यग्व्यवस्थितः। **सेनानीः**—स्कन्दः। **आयस्तचेताः**—खिन्नचित्तः।

मा विहासिष्ट—न त्यजत; जहातेर्माङि लुङ्। **अप्रमथगणैरिव**—प्रमथगणेभ्यो भिन्नैरिव। **कृताः**—पूर्वमुपार्जिताः, पश्चात् ध्वस्ताः ते—कृतध्वस्ताः **गुणाः** यस्य तस्मात्। **अमणिः**—मणिरहितः। **च्युतोपलः**—भ्रष्टरत्नः।

इति सेनान्यां सत्यपि शासति तानेनेकधा गच्छतो गणानन्धकारिर्हसन निषिध्य तस्थौ। शत्रोर्दुरुत्तरे महेषुजलधौ वर्तमाना सा पताकिनी पारमिवेशानं प्राप्याश्वशास। अथ जिष्णोरुपरि शरानीशे सति मुञ्चति, धराधरः पिनाकस्वनपूरितः स्फुटन्निव दध्वान। प्रमथगणास्तद्भीमं तयोर्युद्धं चित्रसंस्था इव विस्मयेनाचला ददृशुः। पार्थस्य बाणाः पशुपतेर्विशिखावलिम्, पयोमुचः सावित्रीमंशुसंहतिमिव नीरन्ध्रा आवव्रुः। त्रिलोचनश्च सव्यसाचिनः शरवृष्टिं महतीं विधूय मार्गणैः स्वैस्तपनस्यमार्गं रुरोध। कपिध्वजश्च शिवशिलीमुखैः स्वपत्रिणां पङ्क्तीर्विलङ्घ्य भिन्नोऽपि न चक्रम्पे। शम्भुनैवं विफलीकृतयत्नो गाण्डीवधन्वा मन्युना परमेण तेजः किरन्, शिवधनुर्मण्डलात् प्रवृत्तमिषुसङ्घातं निवारयिष्यन्, धरित्रीं शिलीमुखच्छायामण्डलेनावृतां विदधे। इति बहुधा महेषूनीशस्याशुपातिनो मुहुः शरौघैरपवारयतः, चलाचलस्य, क्रियावशादनेकस्येवावभासमानस्य, लक्ष्मीवतो धनञ्जयस्य शिवेन वितायमानं वीर्यं संपश्यतां मुनीनां तत्त्वविदामपि रोमाञ्चमङ्गान्यतितरां बिभरांबभूवुः॥

दुरुत्तरे—दुस्तरे। **सवितुरियं सावित्री** ताम्। **वितायमानं**—विस्तार्यमाणम्।

। षोडशः सर्गः ।

धनञ्जयस्ततः किराताधिपतेर्वीक्ष्यालघ्वीमाजिक्रियां विवृद्ध-मन्युरेवं तर्कयामास । "नेह मदस्रतिश्यामितगण्डाः शिक्षिताः क्रामन्ति नागाः । धृतकेतनेन मन्द्रध्वनिना महारथौघेन न संनिरुद्धा धरित्री । नाश्वीयमिह विभिन्नमर्यादमावृणोत्याशाः । न च ध्वजिन्याः पदवीं शोणितौघैः पङ्किरिव विष्टम्भयद्भिः स्थलान्या-श्यानघनान्यासन् । तथापि मम शक्तिरियं हीनयुद्धेऽस्मिन् संप्रति तारापतिधाम्नि सौरी दीप्तिरिवावसीदति । किमेषा माया, किं वा मतिभ्रमः, किं नु मे वीर्यं ध्वस्तम् , उताहमेव कोऽप्यन्यः; गाण्डीवेन मुक्ताः शरा हि मे यथा पुरा परिपन्थिषु न तथास्मिन् किराते पराक्रमन्ते । किं च धनुषः प्रणादैर्विष्णोः पदं द्विधा कुर्वन्निव-स्थित एष प्रतियोद्धा नूनं न तथा यथास्य वेषः; चेष्टा हि प्रच्छन्नमप्यू-हयते । सत्यपि महति युद्धोद्यमे, मुखेनास्य त्यक्तविकारेण प्रस-न्नेन शशलाञ्छनस्य धियते लक्ष्मीः । अल्पेऽपि परस्य विवरे

आजिक्रियां--युद्धकर्म । **विष्टम्भयद्भिः**--निवारयद्भिः; दुस्सं-चारां कुर्वद्भिरित्यर्थः । **हीनयुद्धे**--किरातयुद्धे । **तारापतिधाम्नि**--चन्द्रतेजसि । सूर्यस्येयं **सौरी**। **परिपन्थिषु**--रिपुषु। **विष्णोः पदं**--आकाशम्। **प्रच्छन्नमपि**—निगूढं स्वरूपमपि । **अल्पेऽपि** परस्य

भूयानभियोगः, स्वस्यानल्पेऽपि रन्ध्रे प्रसह्य तस्य संरक्षणमितीदं भीष्मेऽपि गुरौ वाप्यसंभाव्यम्; वनेचरेषु तु न संभवत्येव । आ-हवमत्तस्याप्राकृतस्यास्त्रबलेनास्य निवार्यं वीर्यम्; अल्पीयसोऽपि रिपोरामयस्येव विवृद्धिर्हि महापकाराय ।"

स एवमहार्यसारः संप्रधार्य, शत्रोः सगणस्य सारं विनेष्यन्, द्रुतं प्रस्वापनास्त्रमाजहार । क्षणाद्दावानलधूमधूम्रा, धाम सहस्र-रश्मेर्निरुन्धती, कापि ततानेशबलानि काली छाया । प्रसह्य त-त्प्रथममासादिता, प्रागल्भ्यं हरन्ती, भीमा निद्रा प्रमथगणानां प्रतिभायाः सपदि विदधे निरासम् । केचिदुत्तमवंशजत्वात् गुरु-स्थिराणि, अनुशीलितत्वात् ज्ञातसाराणि, निबद्धगुणत्वादानतानि च धनूंषि सुसुहृत्कुलानीव समाश्रित्य तस्थुः; केचिदतर्कितमेव पाणि-तलादायुधानि व्यसृजन्; केचिदभिन्नधैर्या असस्थलैः संश्लिष्ट-

---

विवरे भूयानभियोगः—रिपोः सूक्ष्मेऽपि रन्ध्रे भूयिष्ठं ज्ञातृ-त्वम्; परस्य रन्ध्रज्ञातृत्वात् प्रहार उद्योग इत्यर्थः । **गुरौ**—द्रोणाचार्ये ।

अहार्यसारः—अनिवार्यवीर्यः । **विनेष्यन्**—अपनेष्यन् । **ततान**—व्यानशे । **काली**—कृष्णवर्णा । **उत्तमवंशः**—प्रशस्त-कुलम्, सारवान् वेणुश्च । **गुरुस्थिराणि**—महान्ति दृढानि च । **अनुशीलितत्वात्**—परिचितबलत्वात्। **निबद्धगुणत्वात्**—आबद्धमौ-

तरुस्कन्धाः सलीलं नागा इव मदेन मीलन्नयनाः स्रस्तकराः क्रमान्निषेदुः । अथ तिरोहितेन्दोः शम्भुमूर्ध्नः सुमेरुशृङ्गादार्कं बिम्बमिव तेजः किमपि पिशङ्गमुच्चैरुदियाय । छायां तमोमयीं तामिन्दुमौलेर्द्युतिस्तत्त्वस्य संवित्तिरिवाविद्यां विधूय, पूर्वसरी संध्येव सर्वतः पाटलिताम्बुवाहा समुल्लसन्ती, प्रमथगणेभ्यः मपद्मालोकमभ्यादिशती, तेषां लोचनपङ्कजानि विनिद्रतां निनाय । दिशश्च यामवत्यां क्षयं गतायामिव पुनः प्रसेदुः । अस्त्रविरामबुद्धास्ते गणाः, बलाहकवितानेन विमुक्ता दिग्विभागा ज्योतींषीव शस्त्राणि भूयः प्रतिपेदिरे ।

महास्त्रदुर्गे दिग्वारणेनेव परेणैवं भग्ने, जिष्णुरशिथिलप्रयत्नः प्रबन्धनायारीणां भुजङ्गपाशान् ततः प्रजिघाय । लसत्तटिल्लोलानि, समुद्रमद्विषानलानि जिह्वाशतान्युल्लसयन्ती भुजगावलिः, लस्तनभश्वरनिरस्तं नभोमार्गं विवत्रे । प्राणहरेक्षणानां फणावतां लोच-

---

वर्तित्वात्, शौर्यादियुक्तत्वाच्च । **तत्त्वस्य संवित्तिः**—तत्त्वज्ञानम् । **पूर्वसरी संध्या**—प्रातस्सन्ध्या । **अभ्यादिशती**—वितरन्ती । **अस्त्रविरामेण**—प्रस्वापनास्त्रस्योपरमेण, बुद्धाः—विनिद्राः ।

महास्त्र—प्रस्वापनास्त्रम्, तदुर्गमिव तस्मिन् । **भुजङ्गाः**—सर्पा एव पाशाः तान्, नागास्त्राणीति यावत् । **प्रजिघाय**—प्रहितवान् । **उल्लसयन्ती**—चलयन्ती । **विवत्रे**—विशेषेण रुरोध । **प्राणहरेक्षणानां**—दृष्टिविषाणाम् ।

नेभ्यः प्रतप्तचामीकरभासुरेण प्रकाशेन दिशः पिशङ्गयन्त्यो ज्वाला महोल्का इव निश्चक्रमुः । चक्षुश्श्रवसां समूहं तु पशुपतिराशु तार्क्ष्यमन्त्रेण, नयेन परोपजापमिव नेता, निवारयामास । तदानीं सुपर्णव्रजपक्षजन्मा नानागतिर्वायुर्वनस्पतिगहनानि जवेन जरत्तृणानीव वियन्निनाय । स भोगिसङ्घः समूहेन वैनतेयानां शममतो निन्ये ।

एवं नागास्त्रे केवलं रिपुपौरुषस्य कृत्वा प्रकटनसाफल्यमुपरते, समन्युर्जिष्णुरनिन्धनस्य ज्वलनस्यास्त्रमाददे । भाभिर्भित्त्वेव सवितृमण्डलं विष्वग्विसृतस्फुलिङ्गः कृशानुरकृशो विदीर्यमाणानामश्मनां निनादैर्भीमं ध्वनिं वितन्वन् जज्वाल । क्षयकालरौद्रे विलोलार्चिषि रोहिताश्वे लिलक्षतीव लोकमुद्वते, पिनाकी पुनराहूतमहाम्बुवाहं पाशभृतः प्रणिनायास्त्रम् । अनन्तद्युतिरपि विभिन्नमूलः संक्षयमसंशयमुपैति; स हि हव्यवाहस्तोयौघविभिन्नसंहतिः पुरा भवमतः प्रययौ ।

तार्क्ष्यमन्त्रेण—गारुडास्त्रेण । **नयेन**—नीत्या । **परोपजापं**—परकृतं स्वमण्डलभेदमिव । **नेता**—नायकः ।

ज्वलनस्यास्त्रं—आग्नेयास्त्रम् । **रोहिताश्वे**—ज्वलने । **लिलक्षति**—लेढुमिच्छति सतीव । **पाशभृतः**—वरुणस्य । **अनन्तद्युतिः**—महातेजा अपि । **हव्यवाहः**—अग्निः ।

स एवं बहूनां समरनयानामभिज्ञः सव्यसाची यदरातिं सादयिष्यन् विविधमस्त्रमुदासे, तदखिलम्, न्यायवृत्तेः पुंसः पौरुषं विपरीतो विधिरिव, नीलकण्ठः सपदि रिक्ततामुपनिनाय ॥

। सप्तदशः सर्गः ।

अथ मिलेष्विवापदामुद्धरणक्षमेषु तिरोहितेष्वप्यस्त्रेषु, गुरुश्रीः स्वपौरुषेणेव गुरुणा शरासनेन धृतिमभिपुष्यन्, नगानां पतिमिव बद्धमूलं तरसा विपक्षमुन्मूलयिष्यन् पार्थः शरेषु जयमाशशंसे। स चापं दिङ्नाग इवाद्रिशृङ्गं हस्तेन प्रध्वनय्य, शम्भोर्बलानि चेषुभिस्तताप। गणानां पतिरपि, सुरद्विपस्य विषाणप्रहारं हिमवानिव, संप्रीयमाणस्तीव्रं तस्य पराक्रमं चिरं विषेहे।

समरनयानां—रणोपायानाम्। **सादयिष्यन्**—अवसादयितुकामः सन्। **उदासे**—प्रयुक्तवान्। **न्यायेन**—नीत्या, वृत्तिः—वर्तनं यस्य तस्य; नीतिनिष्ठस्येत्यर्थः। **विपरीतो विधिरिव**—प्रतिकूलं दैवमिव। **रिक्ततामुपनिनाय**—संहृतवानित्यर्थः।

उद्धरणक्षमेषु—निवारणसमर्थेषु। **शरेषु जयमाशशंसे**—जयनिर्वाहकत्वात् तदाधारत्वविवक्षायां सप्तमी; शरैर्जयं साधयितुमियेषेत्यर्थः। **प्रतिद्वन्द्विषु**—अर्जुनस्य प्रत्यर्थिषु मध्ये।

प्रतिद्वन्द्विषु तस्य बालेन्दुविशदां कीर्तिं प्रथितां विधास्यन् शम्भुः पर्यायजयापजयामनुक्रमेण रणक्रियां तेन सह कर्तुमियेष।

अर्जुनस्यान्धकारितदिगन्तानां शराणां रवं निशम्य त्रस्तानां प्रमथगणानां क्षोभेण तेन, महाह्रदस्य तरङ्गकम्पेन छायामयस्य दिनकरस्येव, भेदमीश्वरस्य ययावाकृतिः; परं तु न स कोपमवाप; महतां दुर्लक्ष्यचिह्ना हि वृत्तिः। तस्य रणमुखे निपतन्ति शिलीमुखवृन्दानि हरस्येषुजालैरोजस्विभिः, अम्बुराशेर्यादोभिर्यादांसीव सिन्धुमुखागतानि, निजघ्निरे।

अथ जिष्णुः क्रोधोद्धतो भवस्य मार्गणानां प्रमाथिनो बाणान् किरातध्वजिनीनां हृदयेषु दूरमतिलाघवेन निचखान। प्रियैषिणा शिवेन प्रयुक्ताः शरा मर्माणि क्वचिदप्यनामृशन्तः, सुहृत्प्रयुक्ता नर्मवादा इव मुनेः प्रीतिकरा बभूवुः। तस्य स्वायुधातिरेकिणी-

---

भेदं—विकारम्। **यादांसि**—जलजन्तवः। **सिन्धुमुखेन**—नदीमुखेन, **आगतानि**—प्राप्तानि।

प्रमाथिनः—खण्डयतः। **दूरं**—गाढम्। **मर्माणि**—जीवाधारभूतानि स्थानानि। **अनामृशन्तः**—अस्पृशन्तः। **नर्मवादाः**—प्रियवचांसि। **मुनेः**—अर्जुनस्य।

मिषूणां शक्तिमिन्दुमौलिः विषादवक्तव्यबलः पश्यन् बलं स्वमाल-लम्बे। ततस्तपोवीर्याभ्यामुद्धतस्य समरार्णवस्य पारं यियासोर्जिष्णो-रखिलान्यपि महेषुजालानि पर्यास्यर्क इव देवः समाचचाम। तेन बाणक्षयरूपेणानिमित्तेन न पार्थस्तथानुतेपे, यथा रिक्ततया स्वयोर्निषङ्गयोः। तूणयुगस्य, भर्तुः पश्चात्क्रिया तदानीमुपकारिणीव जज्ञे; विफलीकृतायां संभावनायाम्, पत्युः पुरः साहसं ह्यासि-तम्। तमाक्षिप्तेषुजालं शम्भुः शरैर्लौहैः, तत्त्वविचारमध्ये हृतो-त्तरं विपक्षं वक्ता गुरुभिर्दोषैरिव निस्तुतोद। ततश्चण्डो मरुत्तटिद्यु-क्तमम्बुदखण्डं पतङ्गादिव, तस्य बर्ष्मणो वर्म च हैमलेखद्योतित-मचिरेण जहार। धाम्ना तपोवीर्यमयेन युक्तं तमीशः शस्त्राभि-घातैः, विवस्वन्तं त्वष्टेवाजस्रमुल्लिलेख।

विषादेन वक्तव्यानि—निवाच्यानि, बलानि—सैन्यानि यस्य सः। स्वं बलं—आत्मीयं महिमानम्। समाचचाम—संज-हार। अनिमित्तेन—दुर्निमित्तेन। रिक्ततया—शून्यतया। भर्तु-रिति कर्तरि षष्ठी; स्वामिनः। पश्चात्क्रिया—पृष्ठतः करणम्। जज्ञे—जाता। आसितं—स्थितिः। आक्षिप्तानि—आहतानि, इषुजालानि यस्य तम्। तत्त्वविचारमध्ये—वादमध्ये। विपक्षं—प्रतिवादिनम्। वर्ष्मणः—शरीरात्। हैमलेखद्योतितं—खचितक-नकपङ्क्ति भ्राजितम्। त्वष्टा—विश्वकर्मा। उल्लिलेख—ततक्षं।

संरम्भवेगेन गात्रेषूज्झितवेदनेषु स्तैमित्यं चोपगतेषु मुनेरगणि-तेषुराशेर्लौहः कञ्चुक इवापरो बभूवात्ममन्युः। ततः क्षरल्लो-हितेन दिग्धदेहः, क्षितिं पार्ष्णिघातैर्विधुन्वन्निव विमुक्तनादो वेगादास्कन्द्यार्जुनो वज्रकल्पेन शशाङ्कपाण्डुरेण धनुषा, महेभो विषा-णेन स्तम्भमिव, शम्भुं जघान। चापयष्टिः सा रयेण पतन्ती, जह्नुनानीता समुद्धता त्रिपथगेवात्मनि भवेन संनिदधे। रणक्रियासु विकार्मुकः शोचनीयामवस्थां प्रपन्नः स शूलभृता दूरतः पत्रिभिः सलीलं विचिक्षिपे। ततः स वीरव्रतमभिरक्षन्, उपोढकल्याण-फलः, जपोपवासैरिव शिवस्येषुभिरपि तप्तः, श्रियस्तेजसश्चाश्रयं स-विग्रहमिवाहङ्कारमसिमुग्रमाललम्बे। अनवद्यकर्मा स हस्तधृतनि-स्त्रिंशेन रिपुशरानवद्यन्, गतिभेदैश्चित्रं चरन्, यथा भाभिः सह-स्ररश्मिर्वर्त्मनि निजे छायामयश्चाप्सु भात्येकपदे, तथा नभ-सि रणस्थलीषु चासकृत् भूतैः स स्पष्टद्विमूर्तिर्दृष्टः। शिवस्य शिली-मुखेन त्सरुप्रदेशादपवर्जिताङ्गस्तस्यासिः पाणेः, वैद्युतोऽग्निरिव घ

कञ्चुक इवात्ममन्युरिति—रोषवशात् न किंचिदपि प्रहारदुः-खमज्ञासीदित्यर्थः। आस्कन्द्य—अभिद्रुत्य। संनिदधे—सम्यङ्नि-हिता; अन्तर्निलायितेत्यर्थः। विचिक्षिपे—नुन्नः। उपोढ-कल्याणफलः—आसन्नाक्षादिलाभरूपप्रयोजनः। अवद्यन्—खण्डयन्। भूतैः—प्राणिभिः। त्सरुप्रदेशात्—मुष्टिप्रदेशमवधिं

नात् ज्वलन् पपात । स परात् खण्डनमेवं प्राप्य, भुजद्वितीयोऽपि सामर्षो विजेतुमिच्छया भग्नानामश्मनां पादपानां च वृष्टिं ससर्ज ।

तस्मिंश्च वृक्षशिलावर्षे शिवेन नीरन्ध्रैः पृषत्कवर्षैर्निरस्ते, मकर इवामरापगाया वेगेनोन्मज्जन् गाण्डीवी बाणनद्यास्तस्याः प्रतिमुखमेत्य, विषमलोचनस्य वक्षः कनकशिलानिभं भुजाभ्यामाजघान । अपरैरसुगमम्, कीर्तिलक्ष्म्योरुपायभूतं विक्रममभिलषतः पाण्डवस्याङ्कमभ्यागतस्य, सुप्रियस्यैकसूनोर्जनक इवाविनयमपि सेहे स्मरारिः ॥

। अष्टादशः सर्गः ।

ततो भीमभुजायुधे मुनौ द्विरद इवोदग्रे रणमुपेयुषि, शङ्करश्च सतूणीरं स्वं धनुरपास्य, तमयोघनैरिव मुष्टिभिः प्रतिजघान । कपिध्वजः शिवस्य भुजाहतिभिर्भिन्नाः पृथुक्षतीः सुखमिवानुबभूव ;

कृत्वेत्यर्थः । अश्मनां पादपानां च वृष्टिं ससर्ज—अश्मभिः पादपैश्च जघानेत्यर्थः ।

उन्मज्जन्—उत्तरन् । प्रतिमुखं—अभिमुखम् ।

भीमे भुजावेवायुधे यस्य तस्मिन् । धनुः—पिनाकम् । अपास्य—त्यक्त्वा । अयोघनैरिव—लौहमुद्गरैरिव । पृथुक्षतीः—

क इव नाम सत्त्ववतां बृहन्मनसामनुकृतेरपि भवेत् क्षमः । अभिभवोदितेन मन्युना विदीपितो भृशमोजस्वी स जवादभिद्रुत्य, भुजद्वयमिन्दुमौलेः स्वभुजयुगेन संयोज्य समाददे । अथ महारणमल्लयोः, भुजबलगर्वितयोस्तयोः करणशृङ्खलसङ्कलनया गुरू रणः प्रववृते ; येनाचलोऽपि स चलित इवाभूत् । तस्मिंश्च नियुद्धे वेगवशात् कः पाण्डवः को वा शशिमौलिरिति विवेचनाक्षमाः प्रमथगणा मुमुहुः ।

वियति वेगतस्ततः परिप्लुतं त्रिपुरान्तकं जवात् कपिध्वजश्चान्तरा परिप्लुत्य चरणयोर्जगृहे । सपदि कर्मणा तस्य विस्मितः कर्मणां क्षयकरो हरस्तमवनौ क्षेप्तुकामं वक्षसा परिरभ्य निष्पिपेष । अथ सुप्रसन्नः स भगवान् यथास्य समभ्यधिकेन सत्त्वेन न तथा प्रमोदमस्य तपसाप्यायौ ; गुणसंहतेर्निजमेव हि सतामुपकारि सत्त्वमतिरिच्यते । अथ हिमशुचिना भस्मना भूषितगात्रम्, शिरसीन्दुलेखया विराजितम्, वपुश्चातिमनोहरं दधतं हरमुद्वीक्ष्य, संभ्रमाविष्टचेताः, प्रहर्षामृतपरीवाहमग्नः, पुलकाञ्चित-

---

महतो व्रणान् । समाददे—जग्राह । करणशृङ्खलानि—करचरणाद्यवयवबन्धनानि, तेषां सुंकलनया-घटनया । नियुद्धे—बाहुयुद्धे ।

अन्तरा—मध्येमार्गम् । कर्मणां क्षयकरः—मोक्षप्रद इत्यर्थः । गुणसंहतेः—तपस्सेवादिगुणसंघातात् । सत्त्वं—बलम् ।

विग्रहः पाण्डवस्तं काण्डवन्ननाम । अथ क्षणादेव स निजं सहशरधि कार्मुकम्, महत् संवर्मितं स्वं वपुः, यथापुरं निहितमप्यसिम्, वृषमारूढं पशुपतिं तं च युगपत् पश्यन् विस्मयमुपाययौ । तदानीमवनिमम्बुवाहाः शनैः सिषिचुः; वैमानिकाश्चित्राणि दिवः सुरकुसुमान्यवाकिरन्; दुन्दुभिध्वनिश्चाखिलं विमलमानशे नभः । प्रमथमुख्यैः सरोमाञ्चैः परिवन्दितः, कृतकृत्यश्च कृतफलेन तपसा स हरिसूनुरीश्वरं वृषे निषेदिवांसमेवमस्तौषीत् ।

" अणीयसे विश्वविधारिणे नमो
नमोऽन्तिकस्थाय नमो दवीयसे ।
अतीत्य वाचां मनसां च गोचरं
स्थिताय ते तत्पतये नमो नमः ॥ १ ॥

काण्डवत्—दण्डवत् । सह शरधिभ्यां निषङ्गाभ्यां वर्तत इति सहशरधि । संवर्मितं--सम्यक्कवचितम् । सिषिचुः--उक्षांचक्रुः। कृतं फलं भगवत्साक्षात्कारलक्षणं येन तेन ।

अणीयस इति । भवेत्यनन्तरश्लोकात् गृह्यते । हे भव, अणीयसे-सूक्ष्मतराय, तथापि विश्वविधारिणे-जगद्धारकाय, तेतुभ्यं नमः । अन्तिकस्थाय—अन्तर्यामित्या संनिकृष्टाय सते, तथापि दवीयसे-दुर्ग्रहत्वात् दूरतराय, ते नमः । वाचां मनसां च गोचरं विषयमतीत्य स्थिताय--अवाङ्मनसगोचराय, तत्पतये-

शरणं भवन्तमतिकारुणिकं
भव भक्तिगम्यमधिगम्य जनाः ।
जितमृत्यवोऽजित भवन्ति भये
ससुरासुरस्य जगतः शरणम् ॥ २ ॥

तवोत्तरीयं करिचर्म साङ्गजं
ज्वलन्मणिः सारशनं महानहिः ।
स्रगास्यपङ्क्तिः शवभस्म चन्दनं
कला हिमांशोश्च समं चकासति ॥ ३ ॥

तेषां वाङ्मनसामप्यक्षाय ; तदप्यक्षस्तैरेव न दृश्यत इति विरोधः। ते नमः ॥

शरणमिति । हे अजित—अपराजित, हे भव । अतिकारुणिकं—अतिदयालुम् । भक्तिगम्यं—भक्तिमात्रसुलभम् । भवन्तं शरणं—रक्षकम्, अधिगम्य । जितमृत्यवः—विगतमरणाः, अमरा भूत्वेत्यर्थः । जनाः, ससुरासुरस्य जगतः, भये—आपदि । शरणं—स्वयं रक्षितारो भवन्ति ॥

तवेति । साङ्गजं—सलोमकम्, करिचर्म, उत्तरीयं—संव्यानम्; दुस्पर्शमिति भावः । ज्वलन्मणिः—ज्वलद्रत्नः, महानहिः, सारशनं—कटिभूषाविशेषः; योऽन्येषां प्राणहर इत्यर्थः । आस्यपंक्तिः—कपालमाला, स्रक्—माल्यम् । शवभस्म चन्दनम् ; उभयत्राप्यस्पृश्यममङ्गलं चेति भावः। किंच एतानि वस्तूनि, हिमां-

अविग्रहस्याप्यतुलेन हेतुना
समेत-भिन्नद्वयमूर्ति तिष्ठतः ।
तवैव नान्यस्य जगत्सु दृश्यते
विरुद्धवेषाभरणस्य कान्तता ॥ ४ ॥
रक्षोभिः सुरमनुजैर्दितेः सुतैर्वा
यल्लोकेष्वविकलमाप्तमाधिपत्यम् ।

शोः कला च, समं तुल्यतया, चकासति–दीप्यन्ते; त्वदाश्रयवशादरम्यस्यापि रम्यतेति किमशक्यं तवेति भावः ॥

अविग्रहस्येति । अविग्रहस्य—वस्तुतोऽशरीरस्यापि सतः, अतुलेन—दुर्बोधत्वादसदृशेन हेतुना, केनापि कारणेनेत्यर्थः । समेता—संगता, भिन्ना—विलक्षणा च, द्वयी–द्विविधा, स्त्रीपुंसात्मिका, मूर्तिः यस्मिन् कर्मणि तत्—समेतभिन्नद्वयमूर्ति यथा तथा तिष्ठतः; अशरीरस्य शरीरमेव विरुद्धम्; तदपि नारीनरात्मकमिति किमतश्चित्रमस्तीति भावः । एवंविधस्य तवैव जगत्सु विरुद्धे वेषाभरणे पूर्वोक्ते यस्य तस्य–विरुद्धवेषाभरणस्यापि सतः, कान्तता—रमणीयता, दृश्यते ; अन्यस्य न दृश्यते । तस्मादचिन्त्योऽसौ तव महिमेति भावः ॥

रक्षोभिरिति । रक्षोभिः—राक्षसैः। सुरमनुजैः- सुराश्च मनुजाश्च तैः, देवमनुष्यैः । दितेः सुतैः—दैत्यैर्वा । लोकेषु यदविकलं–संपूर्णम्, आधिपत्यं प्राप्तम्, तत्, हे भव, शरणागता-

पाविन्याः शरणगतार्तिहारिणे त-
न्माहात्म्यं भव भवते नमस्क्रियायाः ॥ ९ ॥
असंविदानस्य ममेश संविदां
तितिक्षितुं दुश्चरितं त्वमर्हसि ।
विरोध्य मोहात् पुनरभ्युपेयुषां
गतिर्भवानेव दुरात्मनामपि ॥ १० ॥
आस्तिक्यशुद्धमवतः प्रियधर्म धर्म
धर्मात्मजस्य विहितागसि शत्रुवर्गे ।

नाम्, आर्तिहारिणे–दुःखनाशकाय, भवते–तुभ्यम् । नमस्क्रियायाः, 'नमः स्वस्ति' इत्यादिना चतुर्थी । पाविन्याः—पापहारिण्याः, माहात्म्यं–सामर्थ्यम्; 'न कस्या उन्नत्यै भवति शिरस्त्वय्यवनतिः' इति भावः ॥

असंविदानस्येति । संविदां–ज्ञानानाम्, ईश; 'ईशानः सर्वविद्यानाम्' इति श्रुतेरिति भावः । असंविदानस्य—अज्ञानस्य ; मम दुश्चरितं—शस्त्रप्रयोगरूपं दुश्चेष्टितम् । तितिक्षितुं–सोढुम् । त्वम्, अर्हसि–योग्योऽसि । ननु तव महानपराधः कथं सोढव्यस्तत्राह विरोध्येति । मोहात्—अज्ञानात्। विरोध्य—वैरमुत्पाद्य । पुनरभ्युपेयुषां–पश्चाच्छरणागतानां दुरात्मनामपि भवानेव गतिः । त्वं हि शरणागतानामपराधं न गणयसीत्यर्थः॥

आस्तिक्येति । हे प्रियो धर्मो यस्येति प्रियधर्म । परलोके

संप्राप्नुयां विजयमीश यया समृद्ध्या
तां भूतनाथ विभुतां वितराहवेषु ॥"

इत्युच्चैर्निगदितवन्तं प्रणतशिरसमिन्द्रसूनुं सादरमीशः सान्त्वयित्वा, समुज्ज्वलत् पाशुपतमस्त्रं दधानं धनुर्वेदमस्मा उपादिशत्। अथ त्रिदशपतिपुरोगाश्च लोकपालाश्चन्द्रमौलेरनुज्ञामवाप्य, तस्मै पूर्णकामायाशिषमवितथफलां प्रयुञ्जाना विविधानि विजयशीलान्यस्त्राणि वितेरुः।

ततः शिवेन 'साधय जय च रिपुलोकम्' इति निर्दिष्टः पाण्डुपुत्रो भगवतः शङ्करस्य पादपद्मयोः शिरसानम्य, देवसङ्घैः श्लाघितश्च धृतजयलक्ष्मीरथ गत्वा निजं गृहम्, सादरं ननाम धर्मसूनुम् ॥

। समाप्तः ।

मतिरस्तीति--आस्तिकः--पारलौकिकः, तस्य भाव आस्तिक्यम्, विश्वासः, तेन शुद्धं--विमलम्; धर्मं--वैदिकाचारम्, अवतः--पालयतः; धर्मात्मजस्य--युधिष्ठिरस्य। विहितागसि--कृतापराधे शत्रुवर्गे विषये, हे ईश, यया समृद्ध्या--अस्त्रवैभवेन, विजयं संप्राप्नुयां--भजेयम्। हे भूतनाथ, आहवेषु तां विभूतिं-अस्त्रविद्याम्। वितर--देहि ॥

Dixon Press Madras.